## ॥ तृतीयः स्तबकः प्रारभ्यते ॥

॥श्रीकृष्णायनमः ॥ प० ॥ चंडभानुकृततापसमृद्धिं दातुमद्य ननु तस्य सुतायै॥ ग्रीष्मकालइह किंच समागाद्दर्शनाय रविजाकामितुस्सः ॥ १ ॥

॥ श्रीकृष्णायनमः ॥ अथ क्रमप्राप्तं ग्रीष्मसमयं वर्णयति ॥ चंडभान्विति ॥ स प्रसिद्धो ग्रीष्मकालः इह व्रजे समागात् ॥ आगमने प्रयोजनद्वयं तत्राऽऽद्यमाह ॥ चंडेति ॥ अद्य चंडभानुः सूर्यस्तेन कृता अर्थात्स्वस्मिन् या तापसमृद्धिस्तां ॥ तस्य सूर्यस्य सुतायै यमुनायै दातुं ॥ पितृसमृद्धेरपत्यगामित्वात् ॥ द्वितीयमाह ॥ दर्शनायेति ॥ किंच रविजाया यमुनाया यः कमिता भर्ता श्रीकृष्णस्तस्य दर्शनाय दर्शनं विधातुं ॥ स्वगुणसमृद्धिसंपादकसूर्यजामातृदर्शनस्य योग्यत्वात् ॥ नन्वित्युत्प्रेक्षावाच्युभयान्वयि ॥ स्वागतावृत्तं ॥ स्वागतेति रनभाद्गुरुयुग्ममिति तल्लक्षणात् ॥ १ ॥

ग०॥अथ ग्रीष्मर्तौ प्रचंडमारुतखंडिततटमंडनवृक्षखंडे ऽखंडजगदंडनिलयगांडीवकोदंडमित्रदोर्दंडरक्षिते व्रजमंडले दुर्निवार्यमात्सर्यकलहमध्यस्थे सतीव वसंते गते मार्तंडचंडकरनिकरनिहतशीतसंघके पाखंडप्रचारमंडितमुखपंडितप्रचुरकरा





लकलिकालकल्मषकूटकलितपतितोद्धरणधीरधुरंधराधुरीणा कूलस्थकदंबकदंबजातिजात्यविरलबकुलतमालरसालसरलामलकपाटलाचंपकमंदारकुंदामंदसुवाससहायस्वकीयनीरस्थनीरजनिचयसुगंधसंचयसंपादिताऽतिशयिताऽऽमोदा तटविलसितस्फुटतारमणिप्रतिस्पर्धिरेणुसंघच्छद्मना सखीमिव सहचरीं कुर्वती तपनतनया शशांकवंशावतंसकंसारिभीतिलज्जावशात् तरलतरतरंगततिहस्तसंपर्काऽतिशयशीतलितसुखदसुभगसमीरसमूहेन सा सद्यः स्वपितुरपयशः प्रमार्ष्टुमिव तं पुनर्जीवयामास ॥ १ ॥

अथेति ॥ अथ ग्रीष्मर्तौ व्रजमंडले सा प्रसिद्धा तपनतनया सूर्यतनया यमुना स्वपितुः सूर्यस्याऽपयशः स्वकमितृभगवद्रक्षितव्रजस्थस्य शीतस्य निष्कारणहननजन्यामकीर्तिं प्रमार्ष्टुं प्रकर्षेण निराकर्तुमिव ॥ शशांकेति ॥ शशांकवंशस्य चंद्रवंशस्याऽवतंसः शिरोभूषणभूतो यः कंसारिस्तस्माद्या भीतिः अपराधिनि क्रूरत्वात्सर्वसमर्थत्वाच्च मत्पितुरयं शिक्षां करिष्यतीति तत्संबंधान्मदुपर्यपि क्रोधं करिष्यतीति च भयं ॥ लज्जा च तव पित्रा मदीयकुलकूटस्थचंद्रसंबंधिशीतहननरूपं अनार्यमेतत् कर्म कृतमित्युपहासप्रयुक्ता तयोर्वशात् आयत्तत्वात् ॥ तरलेत्यादि ॥ तरलतरा अतिचंचला ये तरंगा लहर्यस्तेषां या ततिस्सैव हस्तस्तत्संपर्का-

तिशयेन शीतलितो ऽतएव सुखदः सुभगो रमणीयो यः समीरसमूहो वायुसंघस्तेन सद्यः तं शीतसंघं पुनर्जीवयामास ॥ ग्रीष्मर्तुप्रादुर्भावेऽपि यमुनासमीरसंपर्कात्तज्जन्यंतापादिकं व्रजे किमपि नासीदितिभावः ॥ कीदृशे ग्रीष्मर्तौ ॥ प्रचंडेति ॥ प्रचंडैः क्रूरैर्मारुतैर्वायुभिः खंडितो भग्नस्तटमंडनं तीरभूषणभूतो वृक्षखंडो वृक्षसमूहो येनैवंविधस्तस्मिन् ॥ एतेन स्वभूषणभूतवृक्षभंगकरणरूपाऽपराधकारिग्रीष्मपक्षपातितयाऽपि पितुर्याऽपकीर्तिस्तन्निराकरणे यमुनायाः परमादरः सूचितः ॥ कीदृशे व्रजमंडले अखंडजगदिति ॥ अखंडानां समग्राणां जगदंडानां निलयः स चाऽसौ गांडीवकोदंडस्याऽर्जुनस्य मित्रं श्रीकृष्णः तस्य दोर्दंडेन रक्षिते ॥ एतेन तत्रत्यपदार्थमात्रस्योपद्रवराहित्यं सूचितं॥ पुनःकीदृशे ॥ दुर्निवार्येति॥दुर्निवार्यो निवारयितुमशक्यो यो मात्सर्यहेतुकः कलहः अर्थाच्छीतकालग्रीष्मयोः तद्विषये मध्यस्थे सतीव साधाविव साधुसदृशे॥यथा द्वयोः कलहप्रवृत्तयोः सतोः कश्चित्साधुर्मध्यस्थः समत्वं करोति तद्वद्यावत्स्वस्थितिसमत्वकारिणीत्यर्थः ॥ तत्र शैत्यातपयोर्द्वयोरप्याधिक्याऽभावात् ॥ एवंविधे वसंते गते सति॥कलहस्य दुर्निवार्यत्वं निश्चित्य तन्निवारणमनादृत्य गते सति इत्यर्थः॥मार्तंडेति॥मार्तंडस्य सूर्यस्य चंडाः क्रूरा ये कराः किरणास्तेषां निकरेण समूहेन निहतः शीतसंघो यस्मिन्नेवंविधे॥ शैषिकःकप् ॥ अनेन यमुनाया भगवतः सकाशात् भयलज्जयोः कारणं बोधितं ॥ कीदृशी तपनतनया॥पाखंडेति॥पाखंडप्रचारेण मंडितः मुखपंडितैः मुखेनैव पंडिता नाचारादिना तैः प्रचुरश्च ॥ कलियुगधर्मानुपक्रम्य पांडित्ये चापलं वच इति श्रीभागवतोक्तेः



अतएव करालो यः कलिकालस्तत्संबंधि यत्कल्मषकूटं पापसमूहस्तेन कलिता युक्ता अतएव पतितास्तेषां यदुद्धरणं तद्विषये याः धीरधुरंधरा गंगादयस्तासु धुरीणा ॥ एवंभूताया अपि मम पित्रा निष्कारणं शीतहननं कृतमिति तस्या अतीव लज्जाकारणं सूचितं॥तथा ॥ कूलस्थकदंबेत्यादि॥कूलस्था ये कदंबकदंबाः कदंबवृक्षसमुदायाः जातीनां जातयः अवांतरभेदाः अविरला घना ये बकुलास्तमालाः रसालाः आम्राः सरलाः आमलकाः पाटलाः चंपकाः मंदाराः कुंदाश्च एतेषाममंदोऽतिशयितो यः सुवासः सौगंध्यं स सहायो यस्यैवंविधो यः स्वकीयनीरस्थनीरजनिचयसंबंधी सुगंधसंचयस्तेन संपादितः अतिशयिताऽऽमोदो यया सा॥इह धुरीणेत्यंतयमुनाविशेषणेन तत्संपर्कात्पूर्वोक्तपवने पावनत्वं कूलस्थेत्यादिविशेषणेऽतिसंचारनिरोधककदंबादिमहत्तरतरुशालितीरत्वकथनेन मांद्यं जात्यादिसंपर्केण सौगंध्यं नीरस्थनीरजसंसर्गेण शैशिर्यं च व्यज्यते ॥ तथा ॥ तटेत्यादि ॥ तीरे विलसितः स्फुटः तारमणिप्रतिस्पर्द्धी चाकचक्यधावल्यादिना शुद्धमौक्तिकमणिसदृशो यो रेणुसंघः सूक्ष्मसिकतासंघस्तच्छद्मना तन्मिषेण सखींभागीरथीं सहचरीं कुर्वतीव॥नाऽयं रेणुसंघः किंतु सूर्यनिहतशीतोज्जीवने सहकारिणी भागीरथ्येव ॥ तस्या अपि सूर्यवंशस्थभगीरथानीतत्वेन स्वकुलकूटस्थाऽकीर्तिमार्जनस्याऽभीष्टत्वात्॥ १॥

**प० ॥ क्रीडत्यसौ सुखनिधौ निजबालकैस्तैर्नाना**
**द्रुमोच्चयविहंगमशब्दरम्ये॥ वृंदावने नलिनगंध**
**विबंधुरेऽस्मिन्सौख्येन सूर्यतनयातटचारुदेशे॥ २**

क्रीडतीति॥ असौ श्रीकृष्णस्तैः प्रसिद्धैः निजाः स्वीयभक्ता ये गोपबालकास्तैः सह वृंदावने तदधिकरणके॥सूर्यतनयाया यमुनाया यत्तटं तत्संबंधिनि चारौ रम्ये देशे सौख्येन क्रीडति ॥ कीदृशे वृंदावने ॥ सुखनिधौ ॥ तथा ॥ नानेति ॥ अनेकविधवृक्षसंघैः पक्षिशब्दैश्च रम्ये॥ कीदृशे सूर्यतनयातटचारुदेशे ॥ नलिनानां कमलानां गंधेन विशेषेण बंधुरे रम्ये ॥ एतैर्विशेषणैर्वृंदावनस्य यमुनातटदेशस्य च भगवत्क्रीडायोग्यत्वं सूचितं ॥ वसंततिलका वृत्तं ॥ २ ॥

**ग० ॥ तत्समयेऽसौ प्रबलः प्रलंबस्तत्समयोचितबल्लवबालकवेषकृतावहित्थः कृष्णमिदमित्थतया विज्ञाय पाथः पाथसीवाऽथ पृथुकसहस्रेष्वेकीभूय वाल्यवाहकक्रीडासात्म्यमसात्म्योऽपि कुर्वन् ॥ ॥२॥प० ॥ प्रकारहीनं निजनामवर्णद्वयं विलोमं प्रवहंतमेतं॥ स्कंधे निधायाऽथ विधाय देहं नामाऽनुरूपं सजवं प्रतस्थे ॥ ३॥**

अथ प्रलंबासुरो गोपवेषेणाऽऽगत्य बलरामं गृहीत्वा गंतुमुद्यतोऽभूदित्याह ॥ तत्समयइत्यादिगद्यसहितेनप्रकारेत्यादिश्लोकेन॥ अथ तत्समये क्रीडासमये ऽसौ प्रबलः प्रलंबः प्रलंबनामा ऽसुरः प्रकारहीनं प्रकारेण प्रशब्देन हीनं ॥ यद्यपि वर्णात्कार इत्यनेन वर्णनिर्देशे विधीयमानः कारप्रत्ययो वर्णानुकरणवाचकाद्भवति न वर्णसमुदायवाचकात्तथापि उच्चैस्तरां वा वषट्कार इति सूत्रनिर्देशात्सर्वे चकाराः प्रत्याख्यायंतइति भाष्यप्रयोगाद्बहुलवचनाच्च



क्वचित्समुदायादपि भवति ॥ अतएव समुच्चयार्थश्चकार एवकारोऽन्यनिवृत्त्यर्थ इति प्रयुज्यतेऽभियुक्तैः ॥ प्रशब्दहीनत्वादेव वर्णयोर्लब इत्येवंरूपयोर्द्वयं यस्मिन्नेवंविधं तदपि विलोमं विपरीतं बलं इत्येवंरूपं स्वनाम प्रवहंतं ॥ अर्थतः सामर्थ्यं शब्दतो बलसंज्ञां च धारयंतमित्यर्थः ॥ विलोमं प्रवहंतमित्यनेन क्रोधबीजमुपक्षिप्तं ॥ एतं बलरामं स्कंधे निधाय देहं च नामानुरूपं प्रकर्षेणलंबं विधाय सजवं वेगसहितं यथा स्यात्तथा प्रतस्थे ॥ कीदृशः प्रलंबः ॥ तत्समयोचितेति ॥ सः तत्रोपहूय गोपालान् कृष्णः प्राह विहारवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथम् ॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥ कृष्णसंघट्टिनः केचिदासन् रामस्य चापरे ॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः॥यत्राऽऽरोहंतिजेतारोवहंति च पराजिता इति श्रीमद्भागवतप्रसिद्धो यः समयःसिद्धांतः संकेतइतियावत्॥समयाः शपथाऽऽचारकालसिद्धांतसंविद इत्यमरः॥तत्रउचितो यो बल्लवबालकवेषो गोपालबालकवेषस्तेन कृता अवहित्था आकारगुप्तिर्येन स तथाविधः ॥ अवहित्थाऽऽकारगुप्तिरित्यमरः ॥ तथा ॥ कृष्णमित्यादि कुर्वन्नित्यंतं ॥ इदमित्थतया इदमित्थंभावेन वर्णतो लक्षणतश्च ॥ इदमित्थमिति यस्याऽस्ति स इदमित्थस्तस्य भावस्तत्ता ॥ आर्शआद्यजंतात्तल् ॥ पृषोदरादिर्वा ॥ विज्ञाय निश्चयपूर्वकं ज्ञात्वा पाथः उदकं पाथसीव उदके इव पृथुकसहस्रेष्वेकीभूय ॥ अनेन पृथग्भावाऽनर्हमाकारगोपनं सूचितं ॥ स्वयमसात्म्योऽपि न विद्यते सात्म्यं यस्यैवंविधोऽपीति विरोधः॥ परिहारस्तु सोढुं शक्यः सह्यः स एव साह्यः स्वार्थिकोऽण् ॥ न साह्योऽसाह्य इति ॥ वाह्यवाहकक्रीडायां साह्यं

कुर्वन् ॥ असाह्योऽपीत्यनेन स्वभावसिद्धं क्रूरत्वं तस्य सूचितं ॥२॥ उपजातिर्वृत्तं ॥ ३ ॥

**ग० ॥ तत्क्षणमतिदीर्घपीवरतद्वर्ष्मदर्शनसंजातेष त्साध्वसध्वस्तधैर्यः॥ ३॥ प० ॥ सस्मार रूपं निजमाधिदैविकं फणामणिश्रोणिकरैस्सुपाटलम्॥ स्कंधे स्थितोऽसौ प्रजघान मुष्टिना प्राणानिवाऽत्तुं बलभद्र उच्चकैः॥ ४॥**

अथ बलरामस्तद्देहदर्शनेन किंचिद्भयमिव प्राप्य स्वकीयमाधिदैविकं शेषरूपं स्मृत्वा शेषत्वादेव तत्प्राणपवनान् पातुमिव मुष्टिप्रहारेण तं हतवानित्याह ॥ तत्क्षणमितिगद्यसहितेन सस्मारेत्यादिश्लोकेन ॥ तत्क्षणं प्रस्थानसमये असौ बलभद्रः अतिदीर्घं पीवरं पुष्टं यत्तस्य प्रलंबासुरस्य ष्वर्म देहस्तद्दर्शनेन संजातमुत्पन्नमीषत्साध्वसं भयं तेन ध्वस्तं धैर्यं यस्यैवंविधः सन् फणासंबंधिमणिश्रेणीनां किरणैरतिपाटलं निजं स्वीयं आधिदैविकं अधिदैवं भवमाधिदैविकं ॥ अध्यात्मादित्वाठञ् ॥ रूपं अर्थात् शेषरूपं सस्मार स्मृतवान् ॥ अथच स्कंधे स्थितः सन्नेव स्वस्य वाताशनत्वात् तदीयान्प्राणान्प्राणवायूनत्तुमिव उच्चकैरतिशयेन मुष्टिना प्रजघान॥ ३ ॥ इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ४ ॥

**अनंताऽऽकल्पकल्पांतामनंतामंतकोपमः॥ सांतः पपात संतापात्संचूर्णयितुमुत्तमां॥ ५॥**

अनंतेति ॥ अंतकोपमोंतकसदृशः सः प्रलंबः सांतस्सन् सावसानः सन् पपात ॥ अत्रोत्प्रेक्षते ॥ अनंतेति ॥ अनंतस्य शेषस्य आकल्पकल्पा ईषदून आकल्प आकल्पकल्पा तां भूषणसदृशीं तां प्रसिद्धामुत्तमामनंतां पृथ्वीं संतापाद्धेतोः चूर्णयितुमिवेति गम्योत्प्रेक्षा ॥ साक्षात् बलरामस्य तद्भूषणस्य मण्यादेश्च पराभवं कर्तुमसमर्थस्तद्भूषणसदृशीं पृथ्वीं चूर्णयितुमुद्युक्त इवेति भावः ॥५॥



**ग० ॥ तदा हलधरकरशतधारसंवर्धितदानवधराधरपतनधूनितधरण्यवधारणधैर्यविधुराः श्रीदामादिमास्तमुपलभ्याऽलभ्येनाऽऽनंदेन सह धृतिं संदधुः॥ ४॥**

तदेति ॥ तदा तत्पतनवेलायां श्रीदामादिमा गोपास्तं बलराममुपलभ्याऽलभ्येन न केनाऽप्यन्येन निमित्तेन लभ्यते तथाविधेनाऽऽनंदेन सह धृतिं धैर्यं सम्यग्दधुः ॥ कीदृशाः श्रीदामादिमाः॥ हलधरेति ॥ हलधरस्य बलरामस्य यः करः स एव शतधारं वज्रं ॥ शतधारं शतारं चेति वज्रपर्यायेषु त्रिकांडशेषः॥ तेन सम्यग्वर्धितश्छिन्नः ॥ स्वार्थेणिच् ॥ एवंविधो यो दानवः प्रलंबः स एव धराधरः पर्वतस्तस्य पतनेनाऽवधूनिता कंपिता या धरणिस्तस्या अवधारणेन ज्ञानेन कृत्वा धैर्यविधुरा धैर्यरहिताः ॥ ४ ॥

**प० ॥ सुमनःशयसंमुक्तः सुमनस्संघ उल्लसन्॥ बलदेवस्य शुशुभे हासः किं तज्जयश्रियः॥ ६॥**

सुमनइति ॥ बलदेवस्य उत् ऊर्ध्वं लसन् शोभमानः सुमनसां देवानां शयैर्हस्तैः संमुक्तः सुमनःसंघः पुष्पसमूहः शुशुभे ॥ उत्प्रेक्षते ॥ तज्जयश्रियः बलरामजयलक्ष्म्याः हासः किं ॥ सुमनसां शु-

त्वविकस्वरत्वादिसाधर्म्यादेवमारोपः ॥ ६ ॥

**ग० ॥ अथ कदाचिद्भांडीरकवने बहुलबल्लवबालकेषु कृष्णे विहृतिनिरते सति ॥ ५ ॥**

अथ मुंजाटवीस्थाग्निपानलक्षणलीलां प्रस्तौति ॥ अथेति ॥ स्फुटं ॥ ५ ॥

**प० ॥ संसाराटव्यां वै समुद्धरिष्यत्यसौ कथं मग्नान् ॥ लोकाँस्तत्परिचेतुं मुंजाटव्यां विवेश गोवर्गः ॥ ७ ॥**

मुंजाटव्यां गवां प्रवेशमुत्प्रेक्षापूर्वकं वर्णयति ॥ संसारेति ॥ असौ श्रीकृष्णः संसाराटव्यां मग्नान् लोकान् कथमुद्धरिष्यतीति परिचेतुं परीक्षितुमिव गोवर्गो मुंजाटव्यां विवेश ॥ यद्यस्यां मुंजाटव्यां प्रविष्टा अस्मानिदानीमुद्धरिष्यति चेदस्मत्सदृक्षानन्यानपि संसाराटव्यां प्रविष्टानुद्धरिष्यतीति निर्णेष्याम इत्यभिप्रायेण ताः प्रविष्टा इत्यर्थः ॥ ७ ॥

**ग० ॥ ततो निजवर्त्मपरिभ्रष्टक्लिष्टस्वीयपशुचक्रक्रंदितमाकर्ण्य कृष्णस्तन्नामाभिधानैः स्वनमुच्चैश्चकार ॥ तच्छ्रवणात्युत्कूलितहर्षोत्कलितं तदासीत् तदानीं परितः प्रवृद्धप्रबलपवमानप्रेरितचित्रभानुज्वालजालसंतप्तवपुषस्सर्वेऽपि तं प्रवेपिता स्व-**





**त्तापमावेदयामासुस्तदादेशान्मीलितेक्षणाश्च तत्क्षणं बभूवुः ॥ ६ ॥**

ततइति ॥ ततो मुंजाटव्यां गोवर्गप्रवेशानंतरं कृष्णः ॥ निजवर्त्मेत्यादि ॥ निजवर्त्मनः स्वमार्गात् परिभ्रष्टं अतएव क्लिष्टं यत् स्वीयं पशुचक्रं गोवृंदं तस्य क्रंदितं सभयं हंबारवमाकर्ण्य तस्य पशुचक्रस्य अर्थात्संघीभूतानां गवां नाना अनेकानि यान्यभिधानानि नामानि तैः स्वनं आव्हानार्थं शब्दमुच्चैश्चकार ॥ तत्तन्नाम्ना आहूतवानित्यर्थः ॥ प्रकृत्यादित्वात्तृतीया ॥ स्वमार्गपरिभ्रष्टानां स्वीयत्वेनांऽगीकृतानां पशूनामप्याव्हानपूर्वकं क्लेशनिवारणेनाऽनन्यतया सक्तचित्तानामेवं क्लेशनाशनं कैमुत्येन प्रदर्शितं प्रभुणा ॥ तच्छ्रवणेति ॥ तत् गोचक्रं तस्य कृष्णशब्दस्य यत् श्रवणं तेनाऽत्युत्कूलितोऽतितरां वृद्धिं प्राप्तो यो हर्षस्तेनोत्कलितं युक्तमासीत् ॥ तदानीमिति ॥ तदानीं सर्वेऽपि गोपाः तं श्रीकृष्णं स्वत्तापं आवेदयामासुः ॥ तत्क्षणं तदादेशात् कृष्णाऽऽज्ञया मीलितेक्षणाश्च बभूवुरित्यन्वयः ॥ कीदृशाः सर्वे ॥ परितइति ॥ परितः सर्वतः प्रवृद्धो वृद्धिं प्राप्तः प्रबलेन पवमानेन वायुना प्रेरितो यश्चित्रभानुरग्निस्तस्य ज्वालजालेन संतप्तानि वपूंषि येषां ते तथाविधाः अतएव प्रकर्षेणवेपिताः कंपिताः ॥ ६ ॥

**प० ॥ ज्वलज्ज्वलनमंबुवद्घनतरे वने द्राग्विभुः पपौ परमविस्मयं विपुलयन्निजे गोकुले ॥ निरग्निकतयास्थितान् शुचितमान् स्वमुख्यद्विजान् रमाधररसास्पदं शुचियुजः समापादयन् ॥ ८ ॥**

ज्वलदिति ॥ विभुर्निजे गोकुले लक्षणया तत्स्थगोपवर्गे परमविस्मयं परमाश्चर्यं विपुलयन् सन् घनतरे निबिडतरे वने ज्वलज्ज्वलनं ज्वलंतमग्निं अंबुवदुदकवत् द्राक् झटिति पपौ ॥ अंबुवदित्यनेन तज्जन्यमुखदाहाद्यभावो वनस्य निबिडत्वेनाऽग्निवृद्धिर्माभूदिति शीघ्रत्वं च पाने ॥ एतेन स्वभक्तानां स्वप्रभावज्ञानपुरःसरं प्रपंचविस्मरणेन स्वैकतानवृत्तित्वान्निरोधः सूचितः ॥ अत्रोत्प्रेक्षते ॥ निरग्निकतयेत्यादि ॥ निरग्निकतया अग्निराहित्येन स्थितान् शुचितमान् स्वच्छतमान् पक्षे पवित्रतमान् ॥ रमाधररसाऽऽस्पदं लक्ष्म्यधररसस्थानभूतान् पक्षे रमाया धरो विष्णुस्स एव यो रसस्तस्याऽऽस्पदं निवासस्थानभूतान् ॥ ब्राह्मणोमामकीतनुरित्युक्तेः ॥ वेदाः प्रमाणमितिवत्सामानाधिकरण्यं॥ एवंभूतान् स्वमुख्यद्विजान् स्वस्य ये मुखे भवा मुख्या स्ते च ते द्विजा दंताश्च तान् ॥ पक्षे स्वसंबंधिमुख्यब्राह्मणान् शुचियुजः शुचिरग्निस्तद्युजस्तद्विशिष्टान् समापादयन्निवेति गम्योत्प्रेक्षा ॥ सामान्यतो ब्राह्मणमात्रेणाऽग्निरहितेन न स्थेयं किमु मुख्यद्विजैरित्यभिप्रायवता भगवता अग्निविशिष्टत्वं मुख्यद्विजेषु संपादितमिति भावः ॥ पृथ्वी वृत्तं ॥ जसौ जसयला वसुग्रहयतिश्चपृथ्वी गुरुरिति तल्लक्षणात् ॥ ८ ॥

**ग० ॥ तदनु तपनाऽवसाने तद्वदनकुमुदिनीशसंदर्शनादिव तन्नयनकुमुदानि विकचानि बभूवुः ॥ ७॥**

अग्निपानानंतरं भगवदाज्ञया गोपनेत्रोद्घाटनमुत्प्रेक्षापूर्वकं वर्णयति ॥ तदन्विति ॥ तदनु अग्निपानानंतरं तपनावसाने सूर्यास्तसमये अथच तपतीति तपन इति योगेन दावानलसमाप्तौ ॥ तद्वदनेति ॥ तस्य श्रीकृष्णस्य वदनमेव कुमुदिनीशश्चंद्रस्तस्य संदर्शनादिव ॥ तन्नयनेति ॥ तेषां गोपानां नयनान्येव कुमुदानि विकचानि विकसितानि बभूवुः ॥ ७ ॥



**प० ॥ पुनश्च भांडीरकमेत्य तत्र विहृत्य गोपै रणयन् सुवेणुं॥ ययौ स वृंदावनमुच्चहर्षं विवर्द्धयन् बल्लववल्लभासु॥ ९॥**

पुनश्चेति ॥ सः श्रीकृष्णः पुनश्च पुनरपि भांडीरकं नाम वटं एत्य तत्र गोपैः सह विहृत्य क्रीडित्वा सुवेणुं शोभनां मुरलीं रणयन् वादयन् तेन च बल्लववल्लभासु गोपीषु उच्चहर्षं अतिशयितमानंदं विवर्धयंश्च सन् वृंदावनं ययौ ॥ उपेंद्रवज्रा वृत्तं ॥ ९ ॥

**ग० ॥ तदनंतरमसौ स्वतःसिद्धमहोद्धतकेलिधूलिधूसरनिरंतरमदवंधुरसिंधुरधुरीणधोरणीमणीयसींसिद्धसमूहानुविद्धो धराधरः स्वशिखरैरिव धाराधरैः कुर्वन् धुरंधरधरणीधरमणिधरः पातालतलवासीत्थंभूतकिंवदंतीश्रवणाभिज्ञः स्वावसरसमुद्भूतेन रसरूपेण प्रभुणा स्वरससंयोगसंभेदकं तमेव दृष्टपूर्वं गवेषयितुमिव जलासारेण व्रणवृंदस्थपुटितां पवित्रां धरित्रीं वितन्वन् बर्हिचातकझिल्लिकादर्दुरप्रमुखजीवनजीवनजीवजालगिरं**

विजृंभयन् वनसेचनेन पावनं वृंदावनं पावनव
नवृंदावनतां गमयँश्चाऽऽत्मनः सान्निध्येनाऽऽव
र्तगर्तव्यावर्तितकलुषफेनकूटां कालिंदीं वृद्धिं प्रा
पयन् प्रवृद्धपंकप्रपंचेन शकटं गतिहीनं प्रकुर्व
न् पीतपटीमिव सौदामिनीमावेष्टयन् वैजयंतीं
स्रजमिवाऽखंडलकोदंडदंडं प्रकाशयन् मुक्ताफ
लहारयष्टिमिव बकावलिं व्यालंबिनीं वितन्वन्
अतसीकुसुमोपमकांतिवीकाशेन जनलोचनमा
नंदयन् नीलांबरमनिशं सहचरं प्रणयन् निजकृ
पावारिवर्षणवशेन विश्वं गोघटां च परिपालयन्
वेणुरणितस्थानिभूतस्तनितव्याजेन त्वं वंशरंध्र
गोपीजनवदनेंदुष्वेवाऽधराऽमृतसेचनं करोष्यहं
सर्वत्राऽपि करिष्यामीति सेर्ष्यमिव स्वोत्कर्षं श्री
कृष्णं कथयन् चंडभानुचंडभानुप्रतापप्रपीडनेन
गतारिष्टं व्रजमंडलं विभावयन् स्वप्रकाशप्रभावे
न धार्त्तराष्ट्रकुलं व्याकुलं प्रथयन् आत्मीयश्रीप्र
संगेन मनोभवमुद्भावयन् एजत्तरंगपरिपूर्णगुण
गणार्णवप्लवनेन जनमानसमार्द्रयन् धृतवनमा
लो यशोदाबाल इव पयोदकालः शनैःशनैर्व्रज
विषयमवजगाहे॥८॥



अथ क्रमप्राप्तं वर्षावसरं वर्णयति ॥ तदनंतरमितिगद्येन ॥ तदनंतरं
ग्रीष्मसमाप्त्यनंतरं यशोदाबाल इव श्रीकृष्ण इवाऽसौ पयोदकालो
वर्षाकालः शनैःशनैर्व्रजविषयं व्रजदेशं अवजगाहे इत्यन्वयः ॥
कीदृशःपयोदकालः ॥ स्वत इत्यादिकुर्वन्नित्यंतं॥स्वशिखरैःकृत्वा
सिद्धसमूहैरनुविद्धो युक्तो धराधरः पर्वतो हिमालयादिः स इव
धाराधरैर्मेघैः कृत्वा ॥ स्वतइति ॥ स्वतःसिद्धा स्वभावसिद्धा म-
होद्धता या केलिः क्रीडा तत्संबंधिनी या धूलिस्तया धूसरास्ते च
ते निरंतरेणाऽविच्छिन्नेन मदेन दानेन बंधुरा रम्याश्च ये सिंधुरधुरी
णा गजश्रेष्ठाः स्तंबेरमद्विरदसिंधुरनागेति हैमात् तेषां या धोर-
णी परिपाटी तामणीयसीमणुतरां कुर्वन् ॥ यथा महाद्रिः परिमा
णेन स्वशिखरैर्मदोद्धतोच्चगजधोरणीमणुतरां करोत्येवमयमपि म-
हत्तरैर्मेघैः परिमाणतो वर्णेन वर्षणेन चाऽणुतरां कुर्वन्नित्यर्थः ॥
तथा ॥ जलासारेत्यादिवितन्वन्नित्यंतं ॥ जलासारेण जलस्य य
आसारो वेगवद्वर्षणं आसारो वेगवद्वर्षमित्यमरात् तेन पवित्रां भग-
वच्चरणसंचरणेन शुद्धामपि धरित्रीं ॥ व्रणरंध्रेति ॥ व्रणरंध्रेण स्थ-
पुटितां निम्नोन्नतां वितन्वन् ॥ वेगवद्वृष्टौ हि पृथिव्यां छिद्राणि
भवंति ॥ एतेन पृथिव्या मृदुलत्वेन भगवत्संचरणयोग्यत्वं ध्वनि-
तं ॥ तत्रोत्प्रेक्षते ॥ धुरंधरेत्यादि ॥ धुरंधरो धरणीधरो यो मणिध-
रः शेषाख्यो नागः पातालतलवासी अस्ति इत्थंभूता या किंव-
दंती जनश्रुतिः किंवदंती जनश्रुतिरित्यमरात् तस्या यत् श्रवणं ते-
नाऽभिज्ञःसन्॥ स्वेति ॥ स्वशब्देन वर्षाकालः तस्य यो ऽवसरस्त-
स्मिन्संभूतेन उत्पन्नेन रसरूपेण रसोवै स इति श्रुतिप्रसिद्धरसरू-
पेण प्रभुणा श्रीकृष्णेन सह स्वरसस्य स्वसंबंध्युदकरूपरसस्य यः

संयोगस्तस्य सम्यक् भेदकं नाशकं दृष्टपूर्वं श्रीभगवतो मथुरातोगोकुलं प्रति गमनसमये पूर्वं दृष्टं तमेव शेषं गवेषयितुमिव शोधयितुमिव ॥ भगवतो मथुरातो गोकुलागमनसमये दृष्टः शेषः क्वाऽस्तीति विचारयंस्तस्य पातालवासित्वं निश्चित्य दर्शनवेलायां फणांऽऽतर्येण भगवद्वियोगकरणप्रयुक्तवैरवशात् शिक्षणं विधातुमिव भूमौ छिद्राणि विरचयन्नित्यर्थः ॥ तथा ॥ बर्हीत्यादि ॥ बर्हिचातकझिल्लिकादर्दुरप्रमुखा ये जीवनजीवना जलजीवनाः ॥ एतेषां जलददर्शनेनैवाऽधिकसंतोषदर्शनात् ॥ एवंविधा ये जीवाः प्राणिनस्तेषां यज्जालं समूहस्तस्य गिरं वाणीं विजृंभयन् प्रकटयन् ॥ तथा ॥ पावनं वृंदावनं वनसेचनेनोदकसेचनेन ॥ पावनेति ॥ पावनं पवित्रीकरणसमर्थं यद्वनवृंदमुदकसमूहो वनसमूहश्च तदवति रक्षतीत्येवंविधं तस्य भावस्तत्ता तां गमयन् प्रापयन् ॥ चकारः केवलमेघविशेषणसमुच्चायकः ॥ इतः परं श्रीकृष्णसादृश्यबोधकानि तद्विशेषणान्याह ॥ आत्मनइत्यादि ॥ आत्मन इत्यत्राऽऽत्मशब्देन वर्षावसरः श्रीकृष्णश्च आत्मनः सांनिध्येन हेतुना आवर्तानां जलभ्रमाणां ये गर्तास्तैरावर्तिता भ्रामिताः फेनकूटा यस्यास्तां कालिंदीं यमुनां वृद्धिं प्रापयन् ॥ वर्षाकालसान्निध्ये हि नदीनां वृद्धिर्भवतीति गोकुलनयनवेलायां भगवद्दर्शनेन यमुनावृद्धिर्जातेति च प्रसिद्धं ॥ तथा ॥ प्रवृद्धेति ॥ प्रवृद्धो वृद्धिं प्राप्तो यः पंकप्रपंचः कर्दमविस्तारः पापप्रसारश्च तेन शकटं अनः शकटप्रविष्टोऽसुरश्च तं गतिहीनं प्रकर्षेण कुर्वन् ॥ वर्षाकाले हि कर्दमप्रसंगेन शकटानां गतिर्भज्यते ॥ भगवताऽपि शकटभंजनेन तत्प्रविष्टोऽसुरो गतिहीनः पुनः संसारागमनहीनो मुक्तः कृतइति



श्रीमद्भागवतेप्रसिद्धं ॥ तथा ॥ पीतेत्यादि ॥ पीतपटीमिव पीतांबरमिव सौदामिनीं विद्युतं आवेष्टयन् आवेष्टनमिव कुर्वन् परिधानीकुर्वन्नित्यर्थः ॥ तडित् सौदामिनी विद्युदित्यमरः ॥ तथा ॥ वैजयंतीमिति ॥ नानामणिमयीमालावैजयंतीति गीयतइति वचनात् अनेकमणिप्रचुरवैजयंत्याख्यां मालामिव आखंडलस्येंद्रस्य कोदंडदंडं धनुर्यष्टिं प्रकाशयन् ॥ मालाया अनेकमणियुतत्वादिंद्रधनुषश्चानेकमणिसदृशविचित्रवर्णत्वादेवमुपमा ॥ तथा॥मुक्तेत्यादि॥ मुक्ताफलानां मौक्तिकानां या हारयष्टिस्तामिव बकपंक्तिं भुवमारभ्याऽऽकाशपर्यंतं लंबमानां कुर्वन् ॥ वर्षाकाले बकानामानंदोदयः प्रसिद्धः ॥ बकानां शुभ्रत्वेन समानपंक्तिनिविष्टत्वेन चैवमुपमा ॥तथा ॥अतसीति॥ वीकाशः प्रकाशः ॥ मेघानामतसीकुसुमसदृशकांतित्वं भगवतोऽपि तथा ॥तथा॥ नीलांबरमिति॥ नीलवर्णमंबरमाकाशमनिशं निरंतरं सहचरं मित्रं स्वसंचरणाधिकरणत्वात् ॥ पक्षे नीलांबरं बलरामं ॥ नीलांबरो रौहिणेयइत्यमरः ॥ सहचरं स्वसहचारिणं प्रणयन् कुर्वन् ॥ तथा ॥ निजेत्यादि ॥ निजकृपया स्वकीयकृपया यद्वारिवर्षणं तद्वशेन विश्वं वृष्टिद्वारा सस्याद्युत्पादनेन तृणजलादिसंपत्त्या गोघटां गोसमूहं पक्षे स्वकीयकृपारूपवारिवर्षणेन विश्वं स्वस्य गोपत्वेन प्राधान्यात् गोघटां गोसमूहं च परिपालयन् ॥ उभयत्राऽपि ब्राह्मणवसिष्ठन्यायेनोभयोर्ग्रहणं बोध्यं ॥तथा ॥ वेण्विति॥ वेणुरणितस्थानिभूतं तत्स्थानापन्नं तत्सदृशमितियावत् एवंविधं यत् स्तनितं गर्जितं तद्व्याजेन तन्मिषेण सेर्ष्यं श्रीकृष्णं प्रति इति स्वोत्कर्षं कथयन्निव ॥ इतीतिकिं ॥ त्वं वंशरंध्राणि च गोपीजनवदनेंदवश्च तेष्वेवाऽध-

राऽमृतवर्षणं करोषि ॥ अनेन वंशानामतिनिस्सारत्वेन तेषु तत्राऽपि तेषां रंध्रेषु गोपीजनवदनानामिदुत्वोक्त्या तस्य च स्वतोऽमृतरूपत्वेन तत्र चेत्युभयत्राऽपि तद्वर्षणं निरर्थकमिति ध्वन्यते ॥ अहं पुनः सर्वत्र अधरं धरासंबंधशून्यं यदमृतमुदकं तस्य वर्षणं करिष्यामीति ॥ तथा ॥ चंडभान्विति ॥ व्रजमंडलं चंडभानोः सूर्यस्य ये चंडा भानवः क्रूराः किरणास्तेषां यः प्रकृष्टस्तापस्तस्य प्रपीडनेन नाशनेनेत्यर्थः ॥ गतारिष्टं विभावयन् गतोपद्रवं कुर्वन् ॥ पक्षे चंडभानोर्यें चंडकिरणास्तद्वत् यः प्रतापस्तेन कृत्वा यत्प्रपीडनं तेन व्रजमंडलं गतः अरिष्टोऽसुरो यस्मादेवंविधं विभावयन् मनसा विचारयन् ॥ अरिष्टनाशनस्याऽग्रे भावित्वेऽपीदानीं स्वप्रतापप्रभावेन नष्टप्रायं मत्वा तथाविधं पश्यन्नित्यर्थः ॥ तथा ॥ स्वेति ॥ स्वस्य यः प्रकाशः प्रादुर्भावस्तस्य प्रभावेन धार्तराष्ट्राणां हंसानां कुलं व्याकुलं विव्हलं प्रथयन् कुर्वन् ॥ पक्षे स्वप्रतापप्रभावेन धार्त्तराष्ट्राणां दुर्योधनादीनां कुलं व्याकुलं प्रथयन् ॥ तथा ॥ आत्मीयेति ॥ आत्मीया या श्रीः शोभा तत्प्रसंगेन ॥ पक्षे आत्मीया पत्नी या श्रीः रुक्मिणी तत्प्रसंगेन मनोभवं कामं पक्षे तदवतारभूतं प्रद्युम्नं उद्भावयन् जनयन्॥ तथा॥एजदिति ॥ एजंतश्चंचला ये तरंगास्तैः परिपूर्णः गुणानां दुस्तरत्वादीनां गणो यस्यैवंविधो योऽर्णवस्तस्मिन्प्लवनंतरणं तद्विषये जनानां लोकानां मानसं नाऽऽर्द्रयन् स्निग्धं प्रेमविशिष्टमकुर्वन् ॥ वर्षासमये समुद्रतरणस्य दुष्करत्वात् ॥ पक्षे एजत्तरंगपरिपूर्णः अगणित इति यावत् एवंविधो यः स्वस्य गुणगणस्सएवाऽर्णवस्त-





स्मिन्प्लवनेन हेतुना जनमानसं जनानां लोकानां मानसमंतःकरणमार्द्रयन् स्निग्धं कुर्वन् ॥ तथा ॥धृतेति ॥ धृता वनमाला उदकमाला येन स तथाविधः ॥ यद्वा धृतमंगीकृतं वनमरण्यं यया सा धृतवना सा चाऽसौ मा शोभा च तां लाति गृण्हातीति तथाविधः ॥ वनसंबंध्यतिशयितशोभाविशिष्ट इत्यर्थः ॥ पक्षे धृता वनमाला आपादलंबिनी माला वनमालेति गीयते इति लक्षणलक्षिता माला येन स तथाविधः ॥ ८ ॥

**प० ॥भेकाऽनेकगिरां गणैर्घनरवैर्झिल्लीस्वनैः सर्वतो**
**मायूरैः कलवाक्कुलैः सुकलितं कुंजाकुलं काननं॥**
**धारापातविमृष्टवृक्षलतिकागुल्मैस्तृणैस्सौख्यदंश्री**
**नंदात्मजपादपद्मविलसद्वृंदाद्यमाभात्यहो॥ १० ॥**

भेकेति॥भेकानां मंडूकानांअनेकविधा अनेकप्रकारा या गिरो वाण्यःशब्दा इति यावत् तेषां गणैः॥अनेकविधैर्बहुभिर्मंडूकशब्दैरित्यर्थः ॥ तथा ॥ घनरवैर्मेघध्वनिभिः ॥ तथा ॥ झिल्लीनां प्रायोऽरण्यवासिनां घोरस्वनानां कीटविशेषाणां स्वनैः ॥ तथा ॥ मायूरैर्मयूरसंबंधिभिः कलानामव्यक्तमधुराणां वाचां कुलैः ॥ बहुभिर्मयूरध्वनिभिरित्यर्थः ॥ एतैः सर्वैर्ध्वनिभिः सर्वतः समंततः सुकलितं ॥ अथच कुंजैराकुलं ॥ बहुकुंजयुतमित्यर्थः ॥ तथा ॥ धारापातेन विमृष्टैर्निर्मलैर्वृक्षलतागुल्मैः तृणैश्च कृत्वा सौख्यदातृ ॥ तथा ॥ इतस्ततः संचरतः श्रीनंदात्मजस्य श्रीकृष्णस्य पादपद्मैर्भूमावुत्थितैस्तच्चिन्हैः विलसत् शोभमानं वृंदाद्यं काननं वृंदावनमाभाति अतितरां शोभते ॥ शार्दूलविक्रीडितं वृत्तं ॥१०॥

**कीर्तेर्वृद्धिकरौ मुदावनचरौ गोपोषकौ श्यामलौ सश्रीकौ व्रजराजसूनुजलदौ भेदः परंत्वीदृशः॥ पूर्वोक्तो रसिकैस्तदेकगतिकै राधाधरः कथ्यते राधेत्यक्षरवैपरीत्यघटितश्चाऽन्यस्समाभाष्यते॥ ११॥**

कीर्तेरिति ॥ व्रजराजसूनुजलदौ व्रजराजसूनुर्नंदसूनुः श्रीकृष्णश्च जलदो मेघश्चतौ ॥ कीर्तेर्यशसः कर्दमस्यच वृद्धिकरौ ॥ तथा ॥ मुदा हर्षेण वनचरौ वनमरण्यं तत्र चरतीतिवनचरः पक्षे वनेनोदकेन हेतुना समुद्रतीरे चरतीति तथाविधः॥यद्वा चरतीति चरः वनस्योदकस्य चरो भक्षकः समुद्रसंबंध्युदकहर्तेत्यर्थः सच सच ताविव्येकशेषः ॥ तथा ॥ गोपोषकौ गवां धेनूनां गोर्भूमेश्च पोषकौ॥ तथा ॥ श्यामलौ श्यामवर्णौ ॥ तथा ॥ सश्रीकौ श्रिया लक्ष्म्या शोभया च सहितौ स्तः ॥ एतैर्विशेषणैरुभयोः साम्यं प्रतिपाद्योभयोर्व्यतिरेकमाह॥भेदइत्यादिना॥ परंत्वीदृशो भेदः ॥ कीदृश इत्यत आह ॥ पूर्वोक्तइति ॥ पूर्वोक्तः प्रथमोपात्तः श्रीकृष्णस्तदेकगतिकैः स एव श्रीकृष्णएवैका मुख्या गतिर्येषां तैस्तथाविधै रसिकैः ॥ तदेकेति विशेषणेन लौकिकरसिकव्यावृत्तिः॥ रसिकैरित्यनेन भगवतो रसरूपत्वाऽनभिज्ञानां शुष्कज्ञानिनां व्यावृत्तिः ॥ राधाधरः राधाया धरो राधाधर इति कथ्यते ॥ अन्यश्च मेघः ॥ राधेतीति ॥ राधाइत्यनयोरक्षरयोर्यद्वैपरीत्यं धारेति तद्घटितो धाराधर इति समाभाष्यते ॥ एतावतैवोभयोर्व्यतिरेक इतिभावः ॥ पूर्वोक्तमेववृत्तं ॥ ११ ॥

**चपलाचयांऽचितवपुर्विराजते हृतधार्तराष्ट्रकुल**



**राष्ट्रसर्पणः॥ बकसंघकोच्चगतिदः सुवारिदः किल नंदनो व्रजपतेः समश्च सः॥ १२॥**

चपलेति ॥ स प्रसिद्धः सुवारिदः शोभनो मेघः व्रजपतेर्नंदस्य नंदनः पुत्रः श्रीकृष्णश्च समस्तुल्यः परस्परसादृश्यवान् विराजते ॥ समत्वमेव विशेषणैराह ॥ चपलेत्यादि ॥ चपलानां विद्युतां चयेनांऽचितं युक्तं वपुर्यस्य सः॥पक्षे साध्यवसानलक्षणया चपलाशब्देन तत्सदृश्यो गोप्यस्तासां चयेन समुदायेनांऽचितं सत्कृतं वपुर्यस्य सः यद्वा चपलानां लक्ष्मीरूपाणां गोपीनां चयेनेत्यादि पूर्ववत् ॥ चपला च तडिल्लक्ष्म्योरिति मेदिनी ॥ तथा॥ हृतेति ॥ हृतं धार्तराष्ट्रकुलस्य हंसकुलस्य राष्ट्रे स्वराज्ये स्वसमये इतियावत् सर्पणं गमनं येन स तथा पक्षे हृतं धार्तराष्ट्रकुलसंबंधि दुर्योधनादिकुलसंबंधि राष्ट्रसर्पणं राज्यप्राप्तिर्येन स तथा॥ तथा ॥ बकेति॥ बकसंघ एव बकसंघकस्तस्य उच्चगतिदः उत्कृष्टगतिदाता ॥ वर्षाकाले बकानां सहर्षोच्चसंचारस्य प्रसिद्धत्वात् ॥ पक्षे बक इत्युपलक्षणं बकासुरादीनां संघ एव संघकस्तस्य उच्चगतिदः ऊर्ध्वगतिदाता ॥ यद्वा बकादिसंघस्य कं सुखं यस्मात्तादृक् कंसस्तस्य ऊर्ध्वगतिदाता ॥ तद्धंतेत्यर्थः ॥ यद्वा सम इति पृथगुभयोर्विशेषणं ॥ सशोभः पक्षे सलक्ष्मीकः ॥ मंजुभाषिणी वृत्तं ॥ १२ ॥

**ग० ॥ जातुचिदस्मिन्सरसाऽवसरे सा रसरूपा राधिका प्रियस्य काननगमनादिना ऽनुभूयमानतद्वृत्तरदलाऽतिपेशला बालामेवं बभाषे॥ ९॥**

अथ श्रीभागवते स्फुटमनुक्तत्वेऽपि श्रुतिपुराणांतरसंवादात् अ-

भियुक्तादृतत्वेन च राधिकाया विप्रलंभशृंगारं वर्णयति॥जातुचिदिति॥जातुचित् कदाचित्॥अस्मिन्वर्षारूपे सरसाऽवसरे सरससमये सा भगवदनुरक्तत्वेन प्रसिद्धा राधिका बालां स्वसखीं प्रति एवं वक्ष्यमाणप्रकारेण बभाषे वदतिस्म ॥ कीदृशी राधिका ॥ रसरूपा सर्वरसप्रधानभूतशृंगाररसरूपा ॥ एतेन रसरूपश्रीकृष्णविरहाऽसहत्वं तस्याः सूचितं ॥ तथा ॥ प्रियेति ॥ प्रियस्य श्रीकृष्णस्य काननगमनादिना काननगमनेन दिवा आदिशब्दग्राह्येण गुरुजनाद्युपरोधेन रात्रौ च अनुभूयमानं तस्य संभोगविप्रलंभरूपभेदद्वयभिन्नस्य शृंगाररसस्य उत्तरदलं विप्रलंभरूपं यया सा ॥ संयुक्तयोस्तु संभोगो विप्रलंभो वियुक्तयोरिति तल्लक्षणात् ॥ तथा ॥ अतिपेशला अतिरुचिरा अतिचतुरा वा ॥ पेशलो रुचिरे दक्षे इति मेदिनीकोशात् ॥ ९ ॥

**प०॥अय्याल्यंबुदसमयः कलयति किल मे व्यथां विना प्रेष्ठं॥ जीवनवर्धकसंज्ञां युक्तां कर्तुं विशेषतश्चापी॥ १३॥**

तमेव प्रकारमाह ॥ अयीति ॥ अय्यालि हेसखि अंबुदसमयः मेघसमयः प्रेष्ठं विना प्रियतमं श्रीकृष्णं विना मे व्यथां दुःखं कलयति ददाति ॥ किं कर्तुं ॥ जीवनवर्धकसंज्ञां जीवनस्योदकस्य वर्धको वृद्धिकर्त्ता श्लेषेण जीवनस्य जीवितस्य वर्धकश्छेदक इति या संज्ञा तां विशेषतोऽर्थ द्वयरूपेणाऽपि युक्तामनुगतार्थां कर्तुमिवेतिगम्योत्प्रेक्षा ॥ अत्र हेतुगर्भमंबुदसमयस्य विशेषणमाह ॥ यतश्चापी चापवान् यो हि धनुर्धारी स इतरस्य जी-



वितहर्ता भवति मेघेषु चेंद्रचापोपलब्धिः प्रसिद्धतरा ॥ यद्वा ॥ च आपीति च्छेदः ॥ आपमुदकसमूहोऽस्येत्यापी ॥ मत्वर्थीय इनिः ॥ १३ ॥

**किंचेदानीं ननु॥ सीतावियोगकृच्चापी मरुज्जीवनहृत्सखि॥ वाहिनीवर्धकः कांतः श्रावणो रावणायते॥ १४॥**

किंचेति ॥ उत्तरान्वयि॥सीतेति॥किंच इदानीं ननु एतद्विरहवेलायामेव॥ अनेन विरहाऽभावे श्रावणस्य दुःखदत्वाऽभावः सूचितः॥ हे सखि श्रावणो मासः रावणायते रावणवदाचरति ॥ कीदृशः॥ सीतेति॥सीताया लांगलपद्धतेर्वियोगकृत् कर्दमबाहुल्यात्तदा लांगलप्रचाराऽभावात्॥पक्षे सीताया जानक्या रामेण सह वियोगकृत्॥चापी पक्षद्वयेऽपि चापवान्॥मरुदिति॥मरुता वायुना जीवनमुदकं हरतीति मरुज्जीवनहृत् ॥ श्रावणमासे हि वायुवेगेनवृष्टिवैरल्यं भवति ॥ पक्षे मरुतां देवानां जीवनहृत्॥तथा ॥ वाहिनीति॥ वाहिनीनां नदीनां वर्द्धको वृद्धिकर्त्ता पक्षे शत्रुसेनाछेदकः स्वसेनावृद्धिकर्त्तावा ॥ तथा॥ कांतः मनोरमः कमुदकमंते मध्ये यस्येति वा पक्षे वाहिनीवर्धकत्वेन ककारांतः कस्य सुखस्यांऽतोनाशो यस्मादिति वा ॥ १४ ॥

**अन्यच्च॥ तुषारौघस्फुलिंगाऽऽढ्या विद्युद्धेतिविबंधुरा॥ धाराधरप्रधूमाऽसौ प्रावृड्वै पावकायते॥ १५॥**

अन्यच्चेति ॥ श्लोके अन्वेति ॥ तुषारौघेति ॥ हे सखीति संबुद्धिरत्राऽपि संबध्यते ॥ वै निश्चयेन असौ प्रावृट् वर्षाकालः पा-

वकायते पावकवदग्निवदाचरति ॥ अग्निसादृश्यमेव रूपकगर्भैर्विशेषणैराह ॥ तुषारेति ॥ तुषारौघा एव स्फुलिंगास्तैराढ्या परिपूर्णा ॥ तथा ॥ विद्युदिति ॥ विद्युत एव हेतयो ज्वालास्ताभिर्विशेषेण बंधुरा व्याप्ता ॥ तथा ॥ धाराधरेति ॥ धाराधरो मेघ एवप्रकृष्टो धूमोयस्यां सा ॥ १५॥

**गर्जति मेघेतिमिरं तर्जति विद्युद्दले ऽबलां बाला॥**
**लज्जालेशवशादथ तत्रेत्थं प्राह विव्हला मंदम्॥**
**॥ १६॥**

गर्जतीति ॥ कव्युक्तिरियं ॥ अथ मेघे गर्जति सति तथा विद्युद्दले विद्युत्समूहे तिमिरमंधकारं तर्जति तिरस्कुर्वति सति विव्हला विरहवेदनाऽऽकुला बाला राधिका लज्जालेशवशात् अंधकाराऽपगमे मन्मुखविकारादिकं दृष्ट्वा प्रियाऽऽसक्तिं ज्ञास्यति सखीति लज्जा तस्या यो लेशस्तद्वशात् अबलां सखीं प्रति मंदमित्थं वक्ष्यमाणमाह ॥ अत्र विव्हलेत्यनेन मदनाऽऽविर्भावस्य मंदं प्राहेत्यनेन लज्जायाश्च बोधनाद्राधिकाया मध्यात्वं द्योतितं ॥ तल्लक्षणं रसमंजर्यां ॥ समानलज्जामदना मध्येति ॥ १६ ॥

**वर्षत्यधरामृतमयि कर्षति तापं तथांऽबरं स्पृशति ॥ चपलः किं सखि कृष्णः श्रृणु नहि नह्यंबुदः सोयं॥ १७॥**

लज्जावशेनाऽपन्हुतियुक्तं तद्भाषणमनुवदति॥ वर्षतीति॥ अयि सखि चपलः चापल्यविशिष्टः पक्षे चपलाः विद्युतः संत्यस्मिन्निति चपलः॥अर्शआद्यच्॥ अधराऽमृतं अधरोष्ठसंबंध्यमृतं पक्षे धरासं-



बंधशून्यमुदकं वर्षति॥तथा ॥ तापं विरहभवं पक्षे ग्रीष्मभवं कर्षति॥तथा अंबरं वस्त्रं पक्षे आकाशं स्पृशति ॥ इति श्रुत्वा सख्या उक्तं ॥ सखि कृष्णः किमिति ॥ तत् श्रुत्वा ऽपन्हुत्याऽऽह राधिका श्रृणु नहिनहि भवत्प्रश्नविषयः कृष्णो न किंतु सः पूर्वोक्तविशेषणविशिष्टः अयं प्रत्यक्षः अंबुदो मेघः अस्तीति शेषः ॥ १७ ॥

**किंच॥ग०॥सासरलमपि तदाऽऽत्मनि गरलायमानंपवमानमुद्दिश्यैवं प्रबभाषे॥ १०॥**

किंचेति ॥ सा राधिका सरलमपि अकुटिलमपि तदा विरहकाले आत्मनि विषये गरलायमानं गरलवद्विषवदाचरंतं पवमानं वायुमुद्दिश्य एवं वक्ष्यमाणप्रकारेण प्रकर्षेण चातुर्यपूर्वकं बभाषे उक्तवती ॥ १० ॥

**प०॥मलिनं भूतचतुष्टयमपि कुरुते त्वां न वाऽनिलं मेघः॥उत्सारयसि तथाऽपि प्रेष्ठं तं तच्छरीरहीनस्त्वम्॥ १८॥**

यदुक्तवती तदाह॥ मलिनमिति॥हेमारुतेति शेषः॥मेघः भूतचतुष्टयं पृथिव्यप्तेजआकाशात्मकं मलिनं कुरुते भूतांऽतर्वर्तिनमपि त्वामनिलं मलिनं नवानैव कुरुते तथाऽपि प्रेष्ठं मलिनत्वाऽकरणेन प्रियतमं तं मेघं उत्सारयसि निराकरोषि तत्तस्माद्धेतोः त्वं शरीरहीनः शरीरेण हीनोऽसि ॥ स्वोपकारिमित्राऽपाकरणेन कृतघ्नत्वात्त्वं शरीरहीनो जातोऽसीति भावः ॥ वायुसंचारे हि मेघाऽपायो भवतीति प्रसिद्धं ॥ १८ ॥

**मित्रवियोगात्तमा रात्रिरियं भाति विप्रयुक्तेव ॥**

**जलदाऽवसरे मलिनैः सितांशुकैः संवृता निरुच्छ्वासा॥ १९॥**

मित्रेति ॥ इयं रात्रिः ॥ मित्रेति ॥ मित्रस्य सूर्यस्य पक्षे सुहृदः यो वियोगो विरहस्तस्माद्धेतोर्विप्रयुक्तेव विरहिणीव तप्ता तापयुक्ता भाति अत एव जलदावसरे मेघकाले मलिनैः सितांशुकैः शुभ्रकिरणैरर्थाच्चंद्रस्य पक्षे शुभ्रवस्त्रैः संवृता यद्वा विरहवशात् सिता पांडुरवर्णा मलिनैर्वस्त्रैः संवृता च ॥ तथा ॥ निरुच्छ्वासा गात्रस्तंभविशिष्टा पक्षे वायुनिरोधात् स्तब्धसदृशी च अस्ति ॥ ॥ १९ ॥

**इत्थं स्वतापतप्तायै परानंदप्रदः प्रभुः॥ चिक्रीड स तया सार्द्धं वर्धयंश्च रतिं स्मरं॥ २०॥**

इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण स्वतापतप्तायै स्वविरहप्रयुक्तो यस्तापस्तेन तप्तायै ॥ अत्र आत्मीयवाचिना स्वशब्देन स्वविरहो गृह्यते ॥ एवंविधायै राधिकायै ॥ परेति ॥ परः मानुषाद्यक्षरांतगणितानंदापेक्षयोत्कृष्टः स्वसमागमजन्यो यतो वाचो निवर्तंतइत्यादिना प्रतिपादितो ऽगणितो यः स्वानंदस्तं प्रददातीत्येवंविधः प्रभुः श्रीकृष्णस्तया राधिकया सह चिक्रीड ॥ किंकुर्वन् ॥ रतिं प्रीतिं चपरं स्मरं वर्धयन्॥ अत्र भगवान् स्वतापतप्तायै स्वानंदमदत्वा परानंदं दत्तवानिति विरोधाभासध्वनिः ॥ २० ॥

**अथैकदा किल॥ प० ॥ मस्ते धृत्वा तक्रपात्रं वि**





**चित्रं विक्रेतुं ता निर्गताश्चंद्रवक्त्राः॥ दृष्ट्वा श्रीशः संरुरोधाऽऽशु मत्वा रम्ये प्रेष्ठे श्यालके स्पर्धिभारं ॥ २१ ॥**

अथ श्रीभागवताऽनुक्तत्वेऽपि शिष्टादृतत्वेन भगवतो राधादिगोपिकाभ्यो दधियाचनलीलां वर्णयति॥अथैकदाकिलेति ॥ श्लोके अन्वेति॥मस्तेइति॥श्रीशः श्रियो लक्ष्म्या ईशः श्रीकृष्णः मस्ते विचित्रं तक्रपात्रं धृत्वा विक्रेतुं निर्गताश्चंद्रवक्त्राश्चंद्रसदृशवदनास्ताः गोपीः दृष्ट्वा आशु शीघ्रं संरुरोध॥किंकृत्वा॥रम्ये अकलंकतया रमणीये प्रेष्ठे श्रीभ्रातृत्वात्प्रियतमे ततएवच श्यालके अर्थान्मुखाऽभिन्ने चंद्रे स्पर्धिभारं स्पर्धिनः शुभ्रत्वेन चंद्रविरोधिनस्तक्रस्य भारं मत्वेवेति गम्योत्प्रेक्षा ॥ तासां चंद्रवदनत्वेन ताभिर्मस्तके धृतस्य तक्रस्य चंद्रोपरि भारभूतत्वं मत्वा तद्याचनेन भारमपहर्तुं तारुद्धवानिति भावः॥शालिनी वृत्तं ॥ २१ ॥

**ग० ॥ जगाद चेदं॥ हंत प्रिया अस्मानवज्ञाय विविधविचित्रतररत्नभांडभरितदधिदुग्धतक्रभरं गृहीत्वा क्व प्रचलिताः॥ ११ ॥**

हंतेति ॥ हंतहर्षे ॥ हंत हर्षेऽनुकंपायामित्यमरः ॥ हे प्रियाः अस्मान् अवज्ञाय ॥ बहुवचनं स्वीयसहचराभिप्रायेण ॥ विविधान्यनेकप्रकाराणि विचित्रतराणि यानि रत्नमयानि भांडानि तेषु भरितानि पूरितानि यानि दधिदुग्धतक्राणि तेषां भरं भारं गृहीत्वा ॥ भरोऽतिशयभारयोरिति मेदिनी ॥ भारमात्रग्रहणेन तेषामनुपभुक्तत्वं सूचितं ॥ क्व प्रचलिताः ॥ विचित्रेत्यादिविशेष-

णेन दध्यादीनामनर्घ्यत्वं सूचितं ॥ ११ ॥

**प० ॥ देयं देयं पेयमेतत्सुतक्रं शक्रादीनां दुर्लभं यद्धि नित्यं॥ वारंवारं याच्यते याचनीयं नव्यं गव्यं राधिके मह्यमद्य॥ २२॥**

देयमिति ॥ हेराधिके यदेतन्नव्यं गव्यं सुतक्रं हि यस्माच्छक्रादीनां नित्यं दुर्लभं अतः पेयं पातुं योग्यं प्रसंगे सति याचनीयं च मया वारंवारं याच्यते अतो मह्यं देयंदेयं ॥ द्विरुक्त्या तस्मिन्परमादरः सूचितः ॥ शालिनी वृत्तं ॥ २२ ॥

**चक्रेण दैत्यचक्रस्य चक्रे तन्मानकृंतनं ॥ सोऽयं शक्रस्य शक्रो ऽपि चित्रं तक्रमयाचत ॥ २३॥**

चक्रेणेति ॥ कव्युक्तिरियं ॥ य इतिशेषः ॥ यः श्रीकृष्णः चक्रेण निजायुधेन दैत्यचक्रस्य दैत्यसमूहस्य ॥ तदिति ॥ सः दुरुच्छेद्यत्वेन प्रसिद्धश्चाऽसौ मानोऽभिमानः तस्य कृंतनं नाशनं चक्रे॥सोऽयं शक्रस्येंद्रस्याऽपि शक्रः ॥ इंद्रनियंता सन्नपीत्यर्थः ॥ तक्रमयाचत तदेतच्चित्रं ॥ अतिपराक्रमवतः परमैश्वर्यसंपन्नस्य तक्रयाचनमत्याश्चर्यावहमित्यर्थः ॥ २३ ॥

**सर्वाऽधिका राधिकाप्राह चेदम् ॥ प० ॥ भोभो याचनमुचितं विप्राणां नाऽधुना तव त्वं तु॥ व्रजराजात्मज इति वै लोके लोकैः प्रकीर्त्यसे नित्यम्॥ २४॥**

सर्वेति ॥ इदं वक्ष्यमाणं रुद्धाः सर्वगोपिका उद्दिश्य भगवतो या-



चने सति राधिकाया एव उत्तरदानप्रवृत्तौ हेतुगर्भं विशेषणं सर्वाधिकेति॥भोभोइति॥भोभो श्रीकृष्ण याचनंतु विप्राणामुचितं तव तु अधुना एतदवतारे नोचितं ॥ वै निश्चये ॥ कुत इति चेत्तत्राह॥ त्वमिति ॥ त्वं तु लोके भुवने लोकैर्जनैः राजाऽऽत्मजः राज्ञः क्षत्रियस्य वसुदेवस्याऽऽत्मज इति नित्यं प्रकीर्त्यसे ॥ तथाच क्षत्रियत्वात्तव याचनस्याऽनुचितत्वादितो व्रजेत्यर्थः ॥यद्वा व्रजराजाऽऽत्मज इत्येकं पदं ॥ व्रजराजाऽऽत्मजः नंदस्याऽऽत्मज इति नित्यं प्रकीर्त्यसे ॥ व्रजराजात्मज इत्यनेन गोपवर्यस्य तव तक्रयाचनमत्यंताऽनुचितमिति सूचितं ॥ लोकैः प्रकीर्त्यसे इत्यनेन सर्वत्रैवं प्रसिद्धस्य तव तक्रयाचनं संभावितस्येति न्यायेनाऽत्यंतदुःखदमिति सूचितं ॥ नित्यं कीर्त्यसइत्यनेन व्रजराजात्मजत्वेन या लीलास्तासां नित्यत्वं ध्वनितं ॥ २४ ॥

**करप्रसारं कुरुते हि शश्वद्यस्माद्द्विजानामधिपः सुधांशुः॥ कुर्वंति तस्मात्सकलास्तदीयास्तथैव भूमौ नहि चित्रमत्र ॥ २५॥**

याचकत्वं तु ब्राह्मणानामेवं योग्यमिति दृढीकुर्वत्याह ॥ करेति ॥ यस्माद्धेतोर्द्विजानां ब्राह्मणानामधिपः ॥ सोमोऽस्माकं ब्राह्मणानां राजेति श्रुतेः ॥ स्वयं सुधांशुरपि चंद्रः शश्वन्निरंतरं करप्रसारं कुरुते हि निश्चित्तं तस्माद्धेतोः सकलाः संपूर्णाः कलाविशिष्टाश्च तदीया ब्राह्मणाः भूमौ तथैव कुर्वंति करप्रसारं कुर्वंति॥ करप्रसारमित्यत्रकराणां किरणानां प्रसारं हस्तप्रसारमितिचाऽर्थो बोध्यः ॥ एतन्नहि चित्रं॥चंद्रः स्वयं सुधापरिपूर्णोऽपि

शून्येऽप्याकाशे रात्रौ च करप्रसारं कुरुते तदीयाः पुनः कलापरिपूर्णा अपि तथैव भूमौ निरंतरं कुर्वंतीति भावः ॥ उपजातिर्वृत्तं ॥ ॥ २५ ॥

**श्रुत्वेति वचनरचनां चपलायाश्चंचलः कृष्णः ॥ तामेवं प्रबभाषे प्रियंवदः प्रेमतः स्मितं कृत्वा ॥ २६ ॥**

श्रुत्वेतीति ॥ कविवाक्यं ॥ चंचलः कृष्णः चपलाया राधिकायाः इति पूर्वोक्तां वचनरचनां रचितंवचनमित्यर्थः ॥ श्रुत्वा प्रियंवदः प्रियवक्ता श्रीकृष्णः स्मितं कृत्वा प्रेमतः प्रेम्णा ॥ सार्वविभक्तिकस्तसिः ॥ तां राधिकां प्रति एवं वक्ष्यमाणप्रकारेण बभाषे ॥ २६॥

**ग० ॥ अये प्रिये साधुसाधु तवैतद्वचनमस्माकं सम्मतमेव यतस्तदीया एव वयम् ॥ १२ ॥**

तदाह ॥ अयेइति ॥ अये प्रिये हेराधिके तव एतद्वचनं द्विजराजसंबंधिनां याचकत्वप्रतिपादनपरं साधुसाधु अत्यंतसाध्वित्यर्थः ॥ अतएव अस्माकं सम्मतमेव यतो वयं तदीयाः द्विजराजवंशोद्भवाः ॥ १२ ॥

**प० ॥ स्नातं वने खुररजःसु गवां मया च सेवा कृता फलहिमातपवर्षभाजा ॥ तस्मात्तपःफलमिदं मम गोरसाख्यं दातुं प्रसीद रसिके रसदानदक्षे ॥ २७ ॥**

स्नातमिति ॥ यस्माद्धेतोर्मया वने गवां खुररजःसु स्नातं ॥ तथा ॥



फलेति ॥ फलानि च हिमं चाऽऽतपश्च वर्षं चैतानि भजतीति तथाविधेन सता तपस्विवत्फलाऽऽहारपूर्वकं शीताऽऽतपवर्षाणि सहमानेन सतेत्यर्थः॥ फलहिमयोरल्पाच्तरत्वादनियमेन फलशब्दस्य पूर्वनिपातः॥गवां सेवा च कृता तस्माद्धेतोर्हेरसिके अतएव रसदाने शृंगाररसदाने गोरसदाने च दक्षा चतुरा तत्संबोधनं हेरसदानदक्षे मम गोरसाख्यं तपःफलं अर्थान्मह्यं दातुं त्वं प्रसीद ॥ दुग्धादिरूपरसदानदक्षगोरूपदेवताराधनस्य परमरसिकाया भवत्याः सकाशाद्रसप्राप्तिरूपमेव मुख्यं फलमितिभावः ॥ वसंततिलका वृत्तं ॥ २७ ॥

**किं बहुना ॥ क्षीराज्जातस्येंदुराजस्य वंशे प्रोद्भूतानां वंद्यमस्माकमेतत् ॥ तस्माद्देयं यष्टिघातेन नो चेद्भित्वा भांडं भो ग्रहीष्ये सुपेयं ॥ २८ ॥**

बहूक्त्या किं क्षीरसमुद्रोत्पन्नचंद्रवंशोद्भवानामस्माकं दध्यादि स्तुत्यं वंद्यं चास्तीति त्वया ऽवश्यं देयमित्याह ॥ किमिति ॥ क्षीरादितिच ॥ बहुना उक्तेन किं ॥ यस्मादेतत्तक्रादि ॥ क्षीरसमुद्रोत्पन्नत्वात्क्षीरादुपादानाज्जातस्योत्पन्नस्य इंदुराजस्य वंशे प्रोद्भूतानामस्माकं वंद्यमभिवाद्यं स्तुत्यं वाऽस्ति ॥ स्वकुलकूटस्थोपादानोपादेयत्वात् ॥ तस्माद्धेतोः सुपेयमेतन्मह्यमिति शेषः त्वया देयं ॥ नोचेत् न ददासि चेत् यष्टिघातेन भांडं भित्वा ग्रहीष्यामि ॥ नो चेद्यष्टिघातेन भांडं भित्वा ग्रहीष्यामीत्यनेन तक्रादेः स्वकुलकूटस्थसोदरस्थानीयतया स्वस्य गोपराजात्मजत्वेन च तक्रादौ स्वसत्ता सूचिता ॥ शालिनीवृत्तं ॥ २८ ॥

**ग० ॥ एवंविधविविधविचित्रवचनविलाससुधासारसम्मेलननिःसीमसंवृद्धसुललितप्रीतिप्रवाहप्लवनपरवशीकृतमानसा सा वृषभानुसुता निजकरतलकलितकालशेयकलधौतकलशं स्वाऽनुरागरसपूरितं चेत इव तस्मै प्रादात्॥ १३॥**

एवंविधेति ॥ सा वृषभानुसुता राधिका तस्मै श्रीकृष्णाय ॥ निजेति ॥ निजकरतलाभ्यां कलितं संपादितं यत्कालशेयं दंडाहतं दधि दंडाहतं कालशेयमित्यमरात् तद्युक्तो यः कलधौतकलशः स्वर्णकलशः कलधौतं रूप्यहेम्नोरित्यमरात् तं प्रादात् ॥ किमिव ॥ स्वानुरागेति ॥ स्वस्याऽनुरागो रतिरेव रसः शृंगाराख्यस्तेन पूरितं चेतोंऽतःकरणमिव ॥ स्वस्याऽनुरागः प्रीतिर्यस्मिन्नेवंविधो यो रसः कालशेयाख्यस्तेन पूरितमिति पूर्वोक्तकलशविशेषणमपि ॥ कीदृशी वृषभानुसुता॥एवंविधेति॥एवंविधः पूर्वोक्तप्रकारो यो विविधविचित्रवचनानां विलासः स एव सुधासारः सुधाऽतिवृष्टिस्तस्याः संमेलनेन निःसीमं निरवधि यथातथा सम्यग्वृद्धो वृद्धिं प्राप्तः॥नद्यादिप्रवाहे नद्यंतरप्रवाहमेलने वृद्धिप्रसिद्धेः ॥ एवंविधः सुललितो यः प्रीतिप्रवाहस्तस्मिन्यत्प्लवनं तरणं तेन परवशीकृतं मानसं यस्याः सा तथाविधा ॥ १३ ॥

**प० ॥ कनककलशमेनं वामहस्ते गृहीत्वा दधिरसपरिपूर्णं संपिबन्सन्ननर्त ॥ रुचिरहसितकृष्णः केकिबर्हावतंसः स खलु निजजनानां शर्मदो नः पुनातु॥ २९॥**



अथ दध्यादिदानप्रकरणसमाप्तौ कविराशिषं प्रार्थयते ॥ कनकेति ॥ एनं राधिकादत्तं कनककलशं वामहस्ते गृहीत्वा रसपरिपूर्णं रसेन स्वादेन परिपूर्णं दधि कालशेयाख्यं संपिबन् सन्यः ननर्त सः रुचिरं रमणीयं हसितं यस्य स चासौ कृष्णश्च सः नः पुनातु इत्यन्वयः ॥ कीदृशः॥केकीति॥केकिबर्हाणि अवतंसाः शिरोभूषणभूतानि यस्यैवंविधः ॥ तथा ॥ खलु निश्चयेन निजजनानां स्वीयभक्तानां शर्मदः सुखदः ॥ मालिनी वृत्तं ॥ २९ ॥

**अथ खलु व्रजे॥शरवृष्टिं निराकुर्वन् जीवने स्वास्थ्यमावहन्॥ निजराजप्रकाशं स वितन्वन् दिक्षु सर्वतः॥ ३०॥**

**वीरोत्तम इवोत्साहात् शरत्कालः समागतः ॥ सुमनोवृंदमामोदसहितं व्यदधाद्गुणैः॥ ३१॥**

अथ क्रमप्राप्तं शरत्प्रादुर्भावमाह ॥ अथखल्विति ॥ शरवृष्टिमिति युग्मं ॥ अथ दधियाचनलीलाविशिष्टवर्षावसानानंतरं खलु वाक्यालंकारे व्रजे व्रजदेशे वीरोत्तम इव उत्साहात् समागतः सः प्रसिद्धः शरत्कालः गुणैः सुमनोवृंदं पुष्पसमूहं यद्वा आनंदयुक्तत्वेन सुमनसः शोभनांतःकरणाः संयोगिनस्तेषांसमूहं पक्षे सुमनसां युद्धप्रसंगेऽपि धीराणां धैर्यवतामन्येषां वीराणां समूहं देवसमूहं वा आमोदसहितं सौगंध्ययुक्तं अतिशयितहर्षसहितं च व्यदधादकरोत्॥ सुमनाः पुष्पमालत्योः स्त्रियां ना धीर देवयोरिति मेदिनी ॥ कीदृशः शरत्कालः वीरोत्तमश्च ॥ शरवृष्टिमुदकवृष्टिं पक्षे बाणवृष्टिं निराकुर्वन् ॥ शरस्तेजनके बाणे दध्यग्रे ना श-

रं जले इति मेदिनी ॥ तथा ॥ जीवने उदके स्वास्थ्यं पूर्वभावाप-त्ति नैर्मल्यं वा पक्षे जीवने स्वस्य जीविते विषये स्वास्थ्यमावहन् धैर्यमावहन्नितियावत् ॥ अथवा स्वस्वामिनो जीवने तदुपलक्षि-ते हृदये स्वास्थ्यमावहन् कुर्वन् ॥ तथा॥सर्वतो दिक्षु ॥ निजेति ॥ निजः स्वकीयो यो राजा चंद्रस्तस्य प्रकाशं वितन्वन् विशेषेण कु-र्वन् मेघाऽऽवरणनिवृत्त्या स्पष्टीकुर्वन् पक्षे निजः स्वामी यो राजा तस्य प्रकाशं प्रसिद्धिं वितन्वन् ॥ ३० ॥ ३१ ॥

**निजकररोधनतत्परमेतमयं पोष्यपोषणे निपुणं॥**
**प्रत्यर्थिभूपमिववै मेघौघं तैर्व्यनाशयच्चंद्रः॥३२॥**

निजेति ॥ अयं चंद्रः एतं मेघौघं प्रत्यर्थिभूपमिव शत्रुभूतं राजा-नमिव तैः करैः व्यनाशयत् नाशयति स्म ॥ कीदृशं मेघौघं प्रत्य-र्थिभूपंच ॥ निजेति॥ निजाः स्वकीया ये कराः किरणाः तेषां रो धने तत्परं पक्षे करो बलिः॥बलिहस्तांशवः करा इत्यमरात् ॥ त-था ॥ पोष्येति ॥ पोष्यस्य विश्वस्य पोषणे निपुणं पक्षे पोष्यस्य प्रजारूपस्य पोषणे निपुणं ॥ ३२ ॥

**निजकुलतिलकं किल तं रासक्रीडां सुशिक्षय न्नेषः॥ तारागणैः परीतश्चंद्रो व्योमांगणे मुदा ह्यु दगात्॥ ३३ ॥**

निजेति ॥ एष चंद्रः स्वकुलतिलकभूतं तं श्रीकृष्णं प्रति रासक्री-डां मंडलीभूतानेकनायिकाभिः सह क्रीडां सुशिक्षयन् ग्राहयन्





किल तारागणैर्नक्षत्रसमूहैः परीतो वेष्टितः सन् मुदा हर्षेण व्यो-मांगणे उदगात् उदितोऽभूत् ॥ ३३ ॥

**कुमुद्वत्करसंस्पर्शात्कुमुदानि प्रफुल्लतां ॥ अगमन् प्रियसंस्पृष्टप्रेयसीवदनानि व ॥ ३४ ॥**

कुमुद्वदिति ॥ कुमुदानि संति विकसनीयत्वेन यस्य सकुमुद्वांश्चंद्र-स्तस्य करसंस्पर्शात् कुमुदानि प्रफुल्लतामगमन् ॥ कानीव ॥ प्रिये-ति ॥ प्रियेण संस्पृष्टानि यानि प्रेयसीनां वदनानि तानि व वशब्द इवार्थे ॥ व वा यथा तथैवैवं साम्ये इत्यमरात् ॥ कुमुद्वच्छब्दस्य चंद्रवाचकत्वं दृष्ट्वा कुमुद्वंतमखंडमंडलमित्यत्र श्रीमद्भागवते ॥ ॥ ३४ ॥

**पीतांबरशोभाभरमवलोक्याऽतिह्रियेव कृष्णस्य॥ विद्युच्छटा विलुप्ता किं वा तस्मिन्विलीनतामागा त्॥ ३५ ॥**

पीतांबरेति ॥ विद्युच्छटा विद्युत्परंपरा कृष्णस्य पीतांबरस्य या शोभा तस्या भरमतिशयं विलोक्य अतिह्रियेवाऽतिलज्जयेव विलुप्ता आसीत्॥ किंवा तस्मिन् पीतांबरे विलीनतां आगात्॥श-रत्काले विद्युत्प्रचारस्य विरलत्वादेवमुत्प्रेक्षा ॥ ३५ ॥

**अत्यच्छां शुचिकर्त्रीं ग्राह्यां कीर्तिं विलोक्य कृ ष्णस्य॥ तद्वैपरीत्यमात्मनि मत्वा कीर्तिस्तदा वि लुप्ताऽभूत्॥ ३६ ॥**

अत्यच्छामिति ॥ तदा शरत्समये कीर्तिः पंकः विलुप्ता अभूत् ॥ किं कृत्वेव ॥ अत्यच्छामतिनिर्मलां शुचिकर्त्रीं पवित्रीकरणस-

मर्थां ग्राह्यां ग्रहीतुं योग्यां कृष्णस्य कीर्तिं विलोक्य आत्मनि स्वस्मिंस्तद्वैपरीत्यं मलिनत्वं मलिनकरत्वमग्राह्यत्वं च मत्वेवेति लुप्तोत्प्रेक्षा ॥ ३६ ॥

**निजपतिकुलकूटस्थं संमुखमालोच्य चंदिरं किमु सा॥ प्रक्षुब्धजीवनाऽपि ह्रिया सुसरला भवद्धूर्यमुना॥ ३७॥**

निजेति ॥ वधूः स्नुषा अथाच्चंद्रस्य ॥ तस्य कुलकूटस्थत्वात् ॥ सा प्रसिद्धा यमुना सुसरला अभवत्॥अत्रहेतुमुत्प्रेक्षते ॥ प्रक्षुब्धजीवनाऽपि वर्षाकालवशेन प्रवृद्धोदका पक्षे प्रक्षुब्धं जीवनं तदुपलक्षितं मानसं यस्याः सा तथाविधाऽपि ॥ निजेत्यादि ॥ निजपतेः श्रीकृष्णस्य यः कुलकूटस्थो मूलपुरुषस्तं चंदिरं चंद्रं संमुखं आलोच्य ह्रिया लज्जया किमु ॥ वर्षाकाले हि मेघावरणवशात् स्पष्टतया दर्शनाऽभावाद्विश्रृंखलविहारवत्यपि इदानीं निरावरणतया स्पष्टदर्शनाद्विश्रृंखलविहारं विहाय सरलाऽभूदिति भावः ॥ ३७ ॥

**चंद्रहास्यमवलोक्य वनं किं संजहास कुसुमालिमिषेण ॥ तत्सुगंधपरिपूरितमेतच्चारुभृंगकुलशब्दसुहृद्यम् ॥ ३८ ॥**

चंद्रेति ॥ एतद्वनं चंद्रहास्यं चंद्रस्य हास्यं चंद्रिकां अवलोक्य कुसुमालिमिषेण शुक्लकुसुमपंक्तिमिषेण संजहास किं ॥ कुसुमालिमिषेण संजहासेत्युक्त्या कुसुमाल्या हासत्वं सिद्धं ॥ वनस्य सौगंध्यविशिष्टत्वान्मंजुलभृंगध्वनिरम्यत्वाच्च रमणीयत्वेन प्रसिद्धे चंद्रहासे च तदभावाद्वनकर्तृकं हसनमित्यभिप्रायगर्भं वनस्य विशेषणद्वयमाह ॥ तत्सुगंधेति चार्विति च॥यस्मादेतद्वनं तेषां कुसुमानां सुगंधेन परिपूरितं॥तथा ॥ चारवो रमणीया ये भृंगकुलस्य शब्दास्तैः सुतरां हृद्यं मनोरमं ॥ स्वागता वृत्तं ॥ स्वागतेति रनभाद्गुरुयुग्ममितिं तल्लक्षणात् ॥ ३८ ॥



**तारोच्चयांचितां रम्यां सितांशुकवतीं निशां॥ ज्योत्स्नाभिसारिकां मन्ये मित्रसंध्यानुगामिनीं॥ ३९॥**

तारोच्चयेति॥अहं रम्यां निशां शरद्रात्रिं ज्योत्स्नाभिसारिकां ज्योत्स्नायां चंद्रिकायां या अभिसारिका प्रियसंकेतगामिनी नायिका तां मन्ये ॥ कीदृशीं निशां ज्योत्स्नाभिसारिकां च ॥ तारोच्चयेति॥ ताराणां नक्षत्राणामुच्चयेन समूहेनांऽचितां युक्तां पक्षे ताराः शुद्धमौक्तिकानि ॥ तारो वानरभिन्मुक्ताविशुद्ध्योः शुद्धमौक्तिके इति मेदिनीकोशात् ॥ तेषां उच्चयेनांऽचितां ॥ तथा ॥ सितेति ॥ सितांशुरेव सितांशुकश्चंद्रस्तद्वतीं पक्षे शुक्लवस्त्रवतीं ॥ तथा॥मित्रेति ॥ मित्रस्य सूर्यस्य या संध्या अस्तमयसमयस्तामनुगच्छतीत्येवंशीलां पक्षे मित्रस्य प्रियस्य यः संधिस्संकेत इति यावत् तेन आसमंतात्सावधानतया अनुगच्छतीत्येवं शीलां ॥ ३९॥

**घंटाघोषघने गवां गिरिवने गोपालकैर्गोधनैः संपन्ने वृजिनार्दने शुभजने गाश्चारयन् सर्वतः॥ वेणोर्गीतिमचीक्लृपद्धरिरिति श्रुत्वा हरिण्यावृता एणास्तत्र समाययुर्द्रुततरं यत्कृष्णसारा इमे॥ ४०॥**

अथ तादृशशरच्छोभारमणीये वने गाश्चारयन् कृष्णो वेणगीत-

मकरोदित्याह ॥ घंटाघोषेति ॥ गोधनैः संपन्ने समृद्धे अतएव गवां घंटाघोषेण घने सांद्रे परिपूर्णे इति यावत् ॥ अतएव वृजिनार्दने वृजिनस्य पापस्य अर्दने नाशकइत्यर्थः ॥ तथा ॥ शुभाः सदाचरणसंपदा भगवद्भक्त्या च कल्याणरूपा जना लोका यस्मिंस्तथाविधे ॥ यद्वा अलौकिकतया भगवल्लीलोपयोगित्वेन कल्याणरूपा जना यस्मिंस्तथाविधे ॥ गिरिसंबंधिनि वने गोपालकैस्सह सर्वतो गाश्चारयन् हरिः वेणोर्गीतं वेणुसंबंधि गानं अचीकृपत् कृतवान् ॥ इत्येतद्वेणुगीतं श्रुत्वा हरिणीभिरावृता एणाहरिणास्तत्र सम्यगादरपूर्वकं आययुः ॥ अत्र हेतुमाह ॥ यदिति ॥ यद्यस्मादिमे हरिणाः नामतः कृष्णसाराः ॥ अथच ॥ कृष्ण एव सारः श्रेष्ठो मुख्य इति यावत् येषां ते तथाविधाः ॥ अत्रत्यानामेव मृगाणामन्वर्थं कृष्णसारत्वमिति श्रीमद्वल्लभाचार्यैः सुबोधिन्यां स्फुटीकृतं ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ४० ॥

ग० ॥ अथ बलानुजः कालिंदीपयःपोषितपयोजपरंपरापरागपरिमलपरिमिलितप्रतीरविटपिप्रसवसुवाससुरभिलसमीरसमूहसुखदे हरिद्वर्णतृणलतागुल्माऽनुविद्धे गिरिहरिदासपरिवृढगर्भिते लोचनपरितोषश्रीपण्ये पशुसमुदायशरण्ये स्वरण्ये वन्यबाल्यविविधक्रीडाभिर्वयस्यैर्वासरमवसाय्य स्वदुग्धधवलिमानं सूचयंतीनामिव धवलीभूतानामस्मत्क्षीरपानेन कृष्णोऽन्वर्थसंज्ञो ऽभवदिति ज्ञापयितुमिव कृष्णतामनुभवंतीनां लग्न



रजःकणप्रोंछनक्रियाप्रस्वेदविषक्तपीतपटरागशंकामिव विजृंभयंतीनां बदरपांडुरतां दर्शयंतीनां पयोदाभिख्यानुरूपोऽयमेवेति विचार्यैव धूम्रविग्रहं वहंतीनामेवं निजगुणानुरोधेन नानाविधांगरागकलितानां तनयकृतपानानंतरमप्यूधस्येधमानस्तन्यभाराऽसहिष्णुतयेवाऽक्षीणि निमील्य चर्वणविश्रांतिरोमंथफेननिचयप्रपंचमिषेण तदेवोत्सृजंतीनां स्वर्णदुर्वर्णसुवर्णमणिगणनवपर्णविभूषणकोरकितानां वत्सवात्सल्येन दुग्दोषाऽरातित्त्वदयशल्यमिव मुहुर्मुहुर्जिह्वांचलं तत्पृष्ठदेशे चंचलयंतीनां भक्तजनहृत्पद्मविष्टरकठिनेतरमनोहरराधावरचरणनलिनविन्यासायेव स्तनोद्भवप्रस्रवणेनाऽटवीवर्त्म मृदुलयंतीनां शौरिमुखशरच्छिशिराभीशुसुतनिजनामसुधां स्तनज्येष्ठां मृष्टतां प्रवर्धयितुमिव तूर्णं कर्णपुटके निधायाऽभ्यर्णं प्राप्तुं हुंकृत्य लांगूलमुद्यम्य धावनं कृत्वाऽऽगतवतीनां खरखुराग्रक्षुण्णक्षोणीदेशोत्पतितधूलिकणधोरणीभिस्तत्कुटिलालकान् धूसरयंतीनां गलभूषणघंटाघणत्कारसहकारपादाभरणसिंजितशब्दितहरित्प्रदेशानां गवां गणैः प

रिवृतो बर्हिबहुलबर्हघटितमुकुटगंडस्थलललकां तिझषाकृतिकुंडलयुगलनासामौक्तिककौस्तुभमुक्तागुंजामणिदामकेयूरकटकांगुलीयक्षुद्रघंटिकामणिमयमंजीराद्यंगभूषणमनोज्ञो गोपीजनमानसक्षणदीप्स्येव हेलिप्रभपीतपटेनाऽऽवेष्टितो बंधुत्वान्नेत्रद्वयेन मेलितुमिवाऽऽगतेनोत्पलेन कृतावतंसो मंथरगतिविलोकनोन्मथितमानसानां ललितव्रजललनानां मन्मथमुत्तंभयन् निजं गोगणं परिवार्य वननिधिवनमंशुमालीव वनमाली सुवेणुंरणयन् मंदंमंदं वृंदावनं प्रविवेश ॥ १४ ॥

अथ वेणुगीतं प्रस्तोष्यन्भगवतो वृंदावनप्रवेशं वर्णयति ॥ अथेत्यादिनागद्येन ॥ अथ बलाऽनुजो बलस्य बलरामस्याऽनुजो वनमाली श्रीकृष्णः निजं गोगणं स्वीयं धेनुसमूहं परिवार्य मेलयित्वा सुवेणुं रणयन् वादयन् सन् मंदंमंदं वृंदावनं प्रविवेशेत्यन्वयः ॥ सुवेणुमित्यत्र सुशब्दो भगवद्वेणोर्वेदरूपत्वादलौकिकत्वबोधनद्वारा वेण्वंतराऽपेक्षया शोभनत्वं बोधयति ॥ वेणोर्वेदरूपत्वं च वंशस्तु भगवान् रुद्र इति श्रुत्या वंशस्य रुद्ररूपत्वकथनात् रुद्रपर्यायशिवशब्दस्य वेदः शिवः शिवो वेद इति श्रुत्या वेदपर्यायत्वबोधनाल्लक्षितलक्षणाविधया सिध्यति॥एतच्च विद्वन्मंडनव्याख्यायां सुवर्णसूत्राभिधायां निजमुरलिकेति मंगलश्लोकव्याख्या-



ने स्फुटीकृतं श्रीपुरुषोत्तमचरणैः॥क इव॥निजं गोगणं स्वीयं किरणसमूहं परिवार्य वननिधिवनं वननिधिर्जलनिधिः समुद्रस्तस्य वनं जलं प्रति अंशुमालीव सूर्य इव ॥ किं कृत्वा ॥ स्वरण्ये व्याख्यास्यमानविशेषणैः शोभने वने वयस्यैर्गोपालैः सह ॥ वन्येति ॥ वनाधिकरणिका या बाल्यसंबंधिन्यो विविधाः क्रीडास्ताभिर्वासरं दिवसमवसाय्य समाप्य ॥ कीदृशे स्वरण्ये॥कालिंदीति॥ कालिंदीपयसा पोषिता या पयोजपरंपरा कमलपरंपरा तत्संबंधिपरागस्य यः परिमलः सौगंध्यं तेन परिमिलितः संगत एवंविधो यः प्रतीरसंबंधिवृक्षकुसुमानां सुवासः सौगंध्यं तेन सुरभिलः सुगंध युक्तो यः समीरसमूहस्तेन सुखदे ॥ एतेन शीतसुगंधिमंदवायु विशिष्टत्वं बोधितं॥तथा ॥ हरिदिति ॥ हरिद्वर्णैस्तृणलतागुल्मैरनुविद्धे व्याप्ते ॥ तथा ॥ गिरीति॥गिरयश्च हरिदासाश्च तेषां परिवृढः प्रभुः तेषु मुख्यइतियावत् गिरिपरिवृढो हरिदासपरिवृढश्च यो गोवर्द्धनस्तेन गर्भिते युक्ते ॥ तदुक्तं श्रीमद्भागवते गोपीकृतवेणुगीतप्रस्तावे ॥ हंताऽयमद्रिरबला हरिदासवर्य इति ॥ तथा ॥ लोचनेति ॥ लोचनयोर्नेत्रयोर्यः परितोषस्तस्य या श्रीः संपत्तिस्तस्याः पण्ये लक्षणया क्रयस्थाने ॥ यद्वा लोचनयोः परितोषो यस्या एवंविधा या श्रीः शोभा सैव पण्यं पणितव्यं यस्मिस्तथाविधे ॥ लोचनपरितोषहेतुभूतशोभाया आपणभूते इत्यर्थः ॥ एतेन श्रियो नित्यनव्यत्वं बाहुल्यं च ध्वन्यते ॥ तृणादिमत्वादेवपश्विति॥शरणे रक्षणे साधु शरण्यं ॥ पशूनां गवादीनां समुदायस्य शरण्यं तस्मिन् ॥ शरणं गृहरक्षित्रोर्वधरक्षणयोरपीति मेदिनी ॥ कीदृशो वनमाली ॥ गवां गणैः परिवृतः ॥ वक्ष्यमाणवर्णभेदेन

गवामनेकविधत्वात्तद्गणे बहुत्वं ॥ तथा ॥ बर्हीति ॥ बर्हिणां मयूराणां बहुलानि यानि बर्हाणि पिच्छानि तैर्घटितं मुकुटं तच्च गंडस्थलयोर्ललंती विकसंती कांतिर्ययोस्तेच ते झषाकृतिनी मकराकारे च तथाविधे ये कुंडले तयोर्युगलं तच्च नासायां धार्यं मौक्तिकं च कौस्तुभश्च मुक्ता मौक्तिकानि गुंजाः कृष्णला मणयश्च तेषां दामानि मालाश्च केयूरे अंगदे च कटके कंकणे च अंगुलीयान्यूर्मिकाश्च क्षुद्रघंटिकाः कटिभूषणभूताश्च मणिमयौ मंजीरौ नूपुरौ च एतदादिभिरंगभूषणैर्मनोहरः॥ तथा ॥ गोपीति ॥ गोपीजनानां मानसमंतःकरणमेव क्षणदीप्तिर्विद्युत्तयेव ॥ हेलिः सूर्यस्तस्य प्रभेव प्रभा यस्यैवंविधो यः पीतपटस्तेनाऽऽवेष्टितः ॥ किरणमालिविरोचनहेलय इति हारावली॥ एतेन तप्तकनकभास्वरत्वं पटस्य सूचितं ॥ तथा॥ बंधुत्वादिति ॥ बंधुत्वात्सौहृदाद्धेतोर्नेत्रद्वयेन नेत्रयुगलेन सह मेलितुमिव संगमं कर्तुमिव समागतेनोत्पलेन कृतावतंसः कृतकर्णपूरः ॥ तथा ॥ मंथरेति ॥ मंथरं मंदं या गतिरर्थात्कृष्णस्य तस्या विलोकनेनाऽवलोकनेनोन्मथितं क्षुब्धं मानसं यासां तासां तथाविधानां ॥ ललिता रमणीया या व्रजललना गोप्यस्तासां मन्मथं काममुत्तंभयन् वर्द्धयन् ॥ कीदृशीनां गवां ॥ स्वदुग्धेति ॥ स्वदुग्धसंबंधिनं धवलिमानं शुभ्रत्वं सूचयंतीनामिव बहिर्धवलीभूतानां शुभ्रतामापन्नानां ॥ तथा ॥ अस्मादिति ॥ अयं कृष्णोऽस्माकं क्षीरपानेन हेतुना अन्वर्थसंज्ञः कृष्णवर्णइत्येवंरूपाऽनुगतार्थनामा अभवदिति ज्ञापयितुं बोधयितुमिव कृष्णतां कृष्णवर्णत्वं अनुभवंतीनां॥





स्वयमपि कृष्णवर्णानामित्यर्थः ॥ तथा ॥ लग्नेति ॥ लग्नाः संसक्ता ये रजःकणास्तेषां या प्रोंछनक्रिया मार्जनकरणं तस्यां तत्समयइतियावत् ॥ प्रस्वेदेन घर्मेण विषक्तः संसक्तो यः पीतपटसंबंधी रागस्तस्य शंकां संभावनां विजृंभयंतीनामिव प्रकटयंतीनामिव बदरवत्पांडुरतां दर्शयंतीनां॥पीतवर्णे रजोमेलने बदरपांडुरत्वं भवतीति प्रसिद्धं ॥ तथा ॥ पयोदेति ॥ पयो दुग्धं ददतीति पयोदा इत्येवंरूपा या अभिख्या नाम श्लेषेण पयोदस्य मेघस्य या ऽभिख्या पयोवर्षणकालीना शोभा तदनुरूपस्तद्योग्योऽयमेव धूम्रवर्णविग्रह एवेति विचार्यैव धूम्रविग्रहं धूम्रवर्णं विग्रहं देहं वहंतीनां॥ तथा॥एवमिति॥एवं पूर्वोक्तप्रकारेण निजगुणाऽनुरोधेन स्वस्वगुणानुसारेण ॥ नानेति ॥ नानाविधा अनेकविधा ये अंगरागा अंगसंबंधिशुक्लादिवर्णास्तैः कलितानां युक्तानां ॥ तथा ॥ तनयेत्यादि ॥ अक्षीणि नेत्राणि निमील्य॥चर्वणेति ॥ चर्वणस्य या विश्रांतिर्विरामस्तद्वेलायां यो रोमंथश्चर्वितस्याऽऽकृष्य पुनश्चर्वणं तत्संबंधी यः फेनस्तस्य यो निचयः समूहस्तस्य यः प्रपंचो विस्तारस्तन्मिषेण तनयकृतपानानंतरं वत्सकृतदुग्धपानानंतरमपि ऊधसि आपीने ॥ एधमानेति ॥ एधमानं वर्धमानं यत्स्तन्यं तस्य यो भारस्तदसहिष्णुतयेवेत्युत्प्रेक्षा ॥ तदेव दुग्धमेवोत्सृजंतीनां ॥ अक्षीणि निमील्येत्यनेन दुग्धत्यागासहत्वं ध्वनितं ॥ लोके हि केचनाऽतिदुस्त्यजपदार्थस्याऽगतिकगतिकत्यागवेलायां दुःखेनाऽक्षिमीलनं कुर्वंति॥सर्वविशेषणैश्च दुग्धसमृध्यतिशयो बोधितः॥ तथा॥स्वर्णेति॥ स्वर्णं च दुर्वर्णं रजतं च सुवर्णः शोभनवर्णो यो मणिगणश्च नवपर्णानि च तन्निर्मितानि यानि भूषणानि तैः कोरकितानां भू-

षितानामिति यावत् ॥ अत्र मणिगणस्य सुवर्णविशेषणेनाऽन-र्घता सूचिता ॥ अथ जिव्हाभिर्वत्सपृष्ठलेहनमुत्प्रेक्षापूर्वकं वर्ण-यितुं विशेषणांतरमाह ॥ वत्सेत्यादि ॥ वत्सप्रेम्णा हेतुना॥दृगिति॥ दृग्दोष एवाऽरातिः शत्रुस्तस्य हृदयशल्यमिव जिव्हांचलं तत्पृष्ठदेशे वत्सपृष्ठदेशे मुहुर्वारंवारं चंचलयंतीनां चंचलंकुर्वतीनां नतु घर्षयं-तीनां॥एतेन व्यथाभावः सूचितः॥गोजिव्हानांकृष्णवर्णत्वाच्छल्य-सादृश्यं ॥ तथा ॥ भक्तेति ॥ भक्तजनानां यद्धृत्पद्मं तदेव विष्टर-आसनं यस्यैवंविधं कठिनेतरत् मृदुलं ॥ अनेन स्वभावतोऽतिमृदु-लभक्तहृत्पद्माधिष्ठिततया भगवच्चरणयोर्मार्दवातिशयसूचनद्वारा भक्तहृत्पद्मसुखदत्वं सूचितं ॥ मनोहरंच यद्राधाधवस्य श्रीकृष्ण-स्य चरणनलिनं तस्य विन्यासायेव स्थापनायेव अटवीवर्त्म अ-रण्यसंबंधिनं मार्गं ॥ अनेन मार्गस्याऽतिकाठिन्यं सूचितं॥ स्तनो-द्भवस्य दुग्धस्य प्रस्रवणेन गलनेन मृदुलयंतीनां मृदुलंकुर्वती-नां ॥ अनेन प्रत्यक्षतो दुग्धसमृद्धिः पशूनामपि भगवद्विषये स्ने-हसमृद्धिश्च बोधिता ॥ तथा ॥ शौरीति ॥ शौरिमुखमेव श्रीकृ-ष्णमुखमेव शरच्छिशिरांशुः शारदश्चंद्रस्तस्मात्स्रुता गलिता या निजनामैव आव्हानार्थं संकेतितस्वसंज्ञैव सुधा तां कर्णपुटके निधाय ॥ अत्रोत्प्रेक्षते ॥ स्तनजेति ॥ स्तनजं दुग्धं तत्र इष्टां मृ-ष्टतां मधुरतां वर्द्धयितुमिव॥भगवन्मुखनिर्गतसंकेतितस्वनामसुधया स्वदुग्धमाधुर्यं वर्धयितुमिवेत्यर्थः ॥ अभ्यर्णं कृष्णसमीपदेशं प्राप्तुं हुंकृत्य लांगूलं पुच्छं उद्यम्य ऊर्ध्वं कृत्वा धावनं च कृत्वा तूर्णं शीघ्रमागतवतीनां ॥ तथा ॥ खरखुराग्रेति ॥ खरैस्तीक्ष्णैः खुरा-ग्रैः क्षुण्णो दलितो यः क्षोणीदेशस्तस्मादुत्पतिता उच्छलिता या



धूलिकणानां धोरण्यः परंपरास्ताभिः तस्य श्रीकृष्णस्य कुटिला-नलकान् धूसरयंतीनां धूसरान् कुर्वतीनां ॥ तथा ॥ गलेति ॥ ग-लभूषणभूतानां घंटानां यो घणत्कारो ध्वनिविशेषस्तस्य सह-कारं सहायभूतं यत्पादाभरणानां सिंजितं तेन शब्दिताः शब्दः संजातो यासां ता मुखरीकृता इति यावत् हरित्प्रदेशा दिक्प्रदे-शा याभिस्तासां ॥ अत्राऽऽभरणपदसमवधानात् सिंजितशब्दस्य शब्दमात्रपरत्वं॥ सकीचकैर्मारुतपूर्णरंध्रैरित्यत्र कीचकशब्दस्य वे-णुमात्रपरत्ववत् ॥ १४ ॥

**५० ॥ कामकांतालवालं तं निकामं कामवर्द्धकं॥**
**श्रुत्वा वेणुरवं गोप्यः कृष्णस्यैवं जगुस्तदा॥४१॥**

कामेति ॥ तदा वृंदावनप्रवेशकालएव गोप्यः बहुवचनात् सर्वा अपि व्रजस्त्रियः तं बर्हापीडं नटवरवपुरित्यादिना श्रीमद्भागवते प्रसिद्धं कृष्णस्य सदानंदरूपस्य भगवतः वेणुरवं श्रुत्वा एवं वक्ष्य-माणप्रकारेण जगुर्वेणुमुद्दिश्य गीतवत्यः ॥ कीदृशं वेणुरवं ॥ का-मस्य कांता रतिः सा च लक्षितलक्षणया प्रीतिस्तस्या आलवा-लं ॥ यथा लताया आलवालं पोषकं तद्वत्पोषकं ॥ अनेन वि-शेषणेन वेणुरवश्रवणानंतरमुद्दीपितप्रीतिवशात्ताभिस्तद्वर्णनमार-ब्धमिति ध्वन्यते॥ तेन तद्व्रजस्त्रिय आश्रुत्येति श्लोकस्याऽर्थः सं-गृहीतः॥पुनः कीदृशम्॥निकाममत्यर्थं कामवर्धकं स्मरवेगाधायकं॥ अनेन स्मरवेगप्रयुक्तमनोविक्षेपात्तासां तद्वर्णनेऽप्यशक्तिर्मध्ये जातेति व्यज्यते ॥ तेन तद्वर्णयितुमारब्धा इति श्लोकस्याऽर्थः संगृहीतः ॥ ४१ ॥

महावंशजातासु मुख्या ऽस्य वंशी स्वरैरंचिता
पूरिता सीधुनेयं ॥ सुवंशोद्भवा वंशरीत्या विही
नाश्वरीकर्ति चित्रं चिरं चित्तहर्त्री॥ ४२॥

तदाह ॥ महावंशेति ॥ स्वरैः षड्जादिभिरंचिता उत्तमस्वरयुतेति-यावत् ॥ अथच स्वं धनं राति ददाति ते स्वराः कुबेरसदृशास्तैरर्च्यं-चिता पूजिता ॥ तथा ॥ सीधुना भगवदधरामृतेन पूरिता पूर्णीकृता॥अतएव चिरं चित्तहर्त्री इयमस्य वृंदावनं प्रविष्टस्य कृष्णस्य वंशी मुरलिका महावंशजातासु उत्तमवंशोत्पन्नासु मध्ये॥ अत्र वंशशब्दो वेणुकुलयोर्वाचकः ॥ मुख्या सत्यपि सुवंशोद्भवा उत्तमकुलोत्पन्नाः अस्मानिति शेषः वंशरीत्या विहीनाः स्वपतीन् विहाय जारसंगतत्वेन उत्तमवंशरीत्या विहीनाश्वरीकर्त्ति अतिशयेन करोति॥ चित्रमेतत् ॥ भुजंगप्रयातं वृत्तं ॥ ४२ ॥

ग० ॥ ततोऽनुक्रमेण प्रबलतरहेमंतावसरः स्वप्र
भावेण चंडभानुं शीघ्रगतिकं कुर्वन् स्वीयलाल
नवशेन वेतंडलपनकरटदानांबुझरीं तरंगयन् स्व
स्थजनेभ्य उत्तमकुमारमुत्पादयन्नधिकनेत्रे तापा
तिरेकं व्यापारयन् भस्माऽवगुंठनमिवाऽभितो नी
हारप्रचारं प्रवर्द्धयन्नित्थंभूतैर्गुणैः सर्वसुखदश्रि
या प्रचुरोऽपि श्रीकंठत्वमनुभावयन्नुग्रसादृश्येने
व सर्वान्सकंपान् ससीत्क्रियांश्च वितन्वन् शीत
करोऽपि वृक्षवृंदं ग्लपयन् जडनिधिरपि मनुजव



र्माण्यारूक्षयन् अयं मत्प्रतिस्पर्द्धीति विचार्यैवो
ष्णरश्मेरत्युष्णतामपहृत्य महिलाजनवक्षोरुहावि
रहिहृदयवापीकूपतूलप्रभृतिषु प्रक्षिपन् कांताकु
चकाठिन्याऽहंक्रियां परिहर्तुमिव जलमपि प्रस्तर
तां प्रापयन्ननेन मदंशापहारः कृत इतीर्ष्ययेव शी
तरश्मिदर्शनोत्सुकतां मनस्यपि लघ्वीं प्रकुर्वन्
शरीरिमानसदेवतासकाशादुत्तमर्णतयाऽऽत्मीय
भागं पुनर्ग्रहीतुमिव रोमांकुराण्युत्कंटकयन् स्वस
हायीभूतसमीरसख्यं संस्मृत्येव विधूमखदिरांऽगा
रपरिपूर्णहसंतिकायां लालसामुल्लासयन् मत्सरेण
निष्कलंकसुंदरीवदनसोमस्तोमच्छविं मंदां विधा
तुमिवाऽमंदससौरभागरुधूमरुचिं परिवर्धयन् स
र्वर्तुसुसारज्ञश्रीमन्नंदनंदनपादपंकजनिकटे नि
जसंभवसंपदमुपदीकर्तुं सपदि तदीयक्रीडास्थलं
निर्मलं व्रजमंडलं मंदंमंदमुपाऽऽजगाम॥ १५॥

अथ क्रमप्राप्तं हेमंतं वर्णयति ॥ ततइति गद्येन ॥ ततः अनुक्रमेण प्रबलतरहेमंतावसरः सर्वेषामृतूनांशोभनो यः सारः स्थिरांशोरमणीयत्वादिरूपः यद्वा सारो बलं तं जानातीत्येवंविधो यः श्रीमान् श्रीरूपगोपिकायुक्तो नंदनंदनः श्रीकृष्णस्तस्य पादपंकजसमीपे निजसंभवसंपदं स्वीयप्रादुर्भावसंबंधिनीं समृद्धिमुपदी-

कर्तुं उपदात्वेन समर्पयितुमित्यर्थः॥ सपदि द्रुतं॥तदीयेति॥भगवत्-संबंधिक्रीडास्थानभूतं निर्मलं पवित्रं व्रजमंडलं प्रति मंदंमंदं उपाजगाम प्राप्तोऽभूत्॥कीदृशः ॥इत्थंभूतैः पूर्वोक्तैर्गुणैः कृत्वा॥सर्वेति ॥ सर्वेषां सुखदा या श्रीः शोभा तया प्रचुरोऽपि पूर्णोऽपि श्रीकंठत्वं श्रीः सर्वेषां दुःखदं विषं कंठे यस्यैवंविधत्वं शिवत्वमनुभावयन् ॥ अथवा सर्वाऽवयवाऽवच्छेदेन सुखदश्रीपूर्णत्वेऽपि कंठाऽवच्छेदेनैव श्रीयुक्तत्वमनुभावयन्॥अथवा यश्च श्रीयुतः स विष्णुरेव अयं तथाविधोऽपि श्रीकंठत्वं शिवत्वं अनुभावयन् इति विरोधः॥परिहारस्तु सर्वो विष्णुस्तस्य सुखदा या श्रीः शोभा तया प्रचुर इति। श्रीकंठत्वं शिवत्वं अनुभावयत् शिवसदृश इत्यर्थ इति च ॥ अथ शिवसादृश्यप्रतिपादकानि विशेषणान्याह ॥ स्वप्रभावेणेति ॥ स्वसामर्थ्येन चंडभानुमपि चंडाः क्रूरा भानवः किरणा यस्येत्यन्वर्थनामानं सूर्यमपि शीघ्रगतिकं कुर्वन् ॥ हेमंते हि सूर्यस्य शीघ्रा गतिर्भवति॥पक्षे स्वप्रभावेण सूर्यं भयद्रुतं कुर्वन् ॥ उक्तंच श्रीभागवते ॥ रुद्रभयाद्यथाऽर्क इति ॥ अत्र च सूर्यकृतशिवप्रदत्तविद्युन्मालिदानवविमानपातनप्रयुक्तक्रोधवच्छिवदृष्टिप्रदग्धपलायमानसूर्यपतनरूपा वामनपुराणोक्ता कथाऽनुसंधेया ॥ तथा॥स्वीयेति ॥ स्वीयं यल्लालनं तद्वशेन वेतंडो गजः ॥ वेतंडशब्दस्य गजे प्रयोगस्तु वेतंडगंडकंडूतिपांडित्यपरिपंथिन इति भामिनीविलासे ॥ तस्य लपने मुखे करटसंबंधिनीं गंडसंबंधिनीं ॥ आननं लपनं मुखं ॥ काकेभगंडौ करटाविति चोभयत्राऽमरात् ॥ दानांऽबुझरीं दानोदकप्रवाहं तरंगयन् विस्तारयन् इति यावत् ॥शीतकालेहि गजा मदस्राविणो भवंति॥पक्षे स्वीयलालनवशेन वेतंडलपनस्य गजा



ननस्य करटसंबंधिनीं दानांबुझरीं तरंगयन्॥तथा॥स्वस्थेति॥अवियुक्तसुखितजनेभ्यः तानुद्दिश्येत्यर्थः उत्तमकुमारं उत्तमस्य विष्णोः कुमारं मदनमुत्पादयन् ॥ पक्षे स्वस्थजनेभ्यः स्वर्गस्थदेवजनांस्तारकासुरभयात् त्रातुं ॥ तुमर्थे चतुर्थी ॥ सर्वाधिकबलवत्वात् उत्तमंकुमारं स्कंदं उत्पादयन् ॥ तथा ॥ अधिकेति ॥ अधिकवत्वे ॥ जात्यैकत्वादेकत्वं ॥ तापातिरेकं औष्ण्याधिक्यं पक्षे के शिरसि तदुपलक्षिते भाले यन्नेत्रं तत्कनेत्रं तस्मिन्नित्यधिकनेत्रे ॥ सप्तम्यर्थेऽव्ययीभावः ॥ तत्र च तृतीयासप्तम्योर्बहुलमित्यमोवैकल्पिकत्वं ॥ यद्वा द्वयाऽपेक्षया अधिके तृतीये नेत्रे तापातिरेकं तापाधिक्यं तस्याऽग्न्यधिकरणत्वात् व्यापारयन् ॥ तथा ॥ भस्मेति ॥ अभितः सर्वतः भस्माऽवगुंठनमिव भस्माऽऽवरणमिव नीहारस्य हिमस्य यः प्रचारस्तं प्रवर्द्धयन् ॥ हिमस्य भस्मनश्च श्वेतत्वादिना साधर्म्यं ॥ अतःपरमसाधारणानि विशेषणान्याह॥ उग्रेति॥ उग्रस्य शिवस्य क्रूरस्य वा यत् सादृश्यमुक्तविशेषणैः साधर्म्यं तेनेव सर्वान्सकंपान् ससीत्क्रियांश्च वितन्वन् कुर्वन् ॥ शीतवशेन सर्वे सकंपाः सीत्कारवंतश्च भवंति क्रूरदर्शनादपि तथाविधा भवंति॥तथा॥शीतकरइति॥शीतकरोऽपि चंद्रोऽपि ओषधीशोऽपीति यावत् वृक्षवृंदं ग्लपयन् इति विरोधः॥परिहारस्तु शीतस्य करः कर्ता शीतकरः ॥ शीतकाले हि शीतवशाद्वृक्षाणां ग्लानिर्भवतीति॥तथा॥जडनिधिरपीति॥डलयोः सावर्ण्यात् ज्जलनिधिरपि मनुजानां मनुष्याणां वर्ष्माणि शरीराणि आरूक्षयन् अतिशयेन रूक्षाणि कुर्वन् ॥ जलेन हि स्निग्धत्वं भवति नतु रौक्ष्यमिति विरोधः परिहारस्तु जडशब्देन भावप्रधाननिर्दे-

शात् शैत्यं तस्य निधिः॥ शीतवशाच्छरीराणि शुष्काणि रूक्षाणि च भवंतीति ॥ तथा ॥ अयमित्यादि ॥ अयं सूर्यः॥ मदिति ॥ मम हेमंतस्य विरोधी उष्णकरत्वात् इति विचार्य उष्णरश्मेः सूर्यात् सकाशादत्युष्णतामपहृत्येव ॥ महिलेत्यादि॥ महिलाजनानां स्त्रीजनानां ये वक्षोरुहाः स्तनाः विरहिणां हृदयानि च वाप्यश्च कूपाश्च तूलः कार्पासश्च एतत्प्रभृतिषु स्थानेषु प्रक्षिपन्॥ प्रभृतिशब्देनोर्णादयो ग्राह्याः॥सूर्यस्य तापाल्पता उक्तपदार्थेषूष्णतास्थितिश्च शीतकालस्वभावसिद्धोत्प्रेक्षापूर्वकं वर्णिता ॥ तथा ॥ कांतेति ॥ कांताकुचसंबंधिनी या काठिन्यप्रयुक्ता अहंक्रियाऽहंकारस्तां परिहर्तुमिव जलमपि द्रवरूपत्वात् अतिमृदुलमपि प्रस्तरतां पाषाणत्वं घनीभावाऽऽपादनेन काठिन्यमिति यावत् प्रापयन् गमयन् ॥ तथा ॥ अनेनेत्यादि ॥ अनेन चंद्रेण ॥ मदिति ॥ मम हेमंतस्य योंऽशः शैत्यं तस्याऽपहारः कृतः इतीर्ष्ययेव ॥ शीतेति ॥ चंद्रदर्शनोत्कंठां मनस्यपि लघ्वीं कुर्वन् ॥ अनेन मनसश्चंद्राऽधिष्ठानत्वेन तत्राऽपि तद्दर्शनोत्कंठाया लघूकरणेन शीतस्य बलवत्ता सूचिता॥तथा ॥शरीरीति॥शरीरिणां प्राणिनां या मानसस्याऽधिष्ठात्री देवता चंद्रस्तत्सकाशात् स्वस्य उत्तमर्णतया ऋणत्वेन धनदातृतया आत्मीयं भागं शैत्यरूपं पुनर्ग्रहीतुमिव रोमांऽकुराणि उत्कंटकयन्नर्थात्प्राणिशरीरेषु प्रादुर्भावयन् ॥ शरीरांऽतःस्थितचंद्रसकाशात् गृह्यमाणशीतकणरूपभागं रोमांचमिषेण प्राणिशरीरेषु दर्शयन् इत्यर्थः ॥ एतैर्विशेषणैर्विरोध्यपकारकारित्वमुक्त्वा स्वीयोपकारकारित्वं वर्णयितुमेकं विशेषणमाह ॥ स्वे-





ति॥ स्वसहायीभूतो यः समीरो वायुस्तस्य यत् सख्यमग्निना सह तत् संस्मृत्येव स्वमित्रमित्रत्वमनुचिंत्येवेत्यर्थः ॥ विधूमेत्यादि ॥ स्फुटं ॥ हसंतिका अंगारधानिका॥लालसामभिलाषं॥तथा॥मत्सरेणेति॥मत्सरेण स्वशैत्याऽपहारप्रयुक्तवैरयुतस्य कामिनीवदनात्मतां प्राप्तस्य निष्कलंकत्वदर्शनप्रयुक्तेन निष्कलंका ये सुंदरीवदनसोमानां स्तोमाः समूहास्तेषां छविं कांतिं मंदां विधातुमिव ॥ अमंदेति ॥ अमंदोऽनल्पो यः ससौरभः सौगंध्ययुक्तोऽगरुधूमस्तत्र रुचिं प्रीतिं परिवर्धयन् ॥ अतिनिर्मलपदार्थे हि धूमसंपर्कान्मालिन्यं भवति ॥ अनेन पूर्वोपकृताऽग्न्युपरि तज्जन्यधूमे रुचिसंपादनद्वारोपकारांतरं ध्वनितं ॥ १५ ॥

**प० ॥ तस्मिन् प्रथमे मासे कात्यायन्यर्चनव्रतं चेरुः॥ भुक्त्वा हविष्यमुत्काः कुमार्य एतास्तु नंदसून्वास्यै॥ ४३॥**

अथ गोपीवस्त्राहरणलीलां वर्णयितुं तदुपोद्घाततया गोपीकृतकात्यायनीव्रताचरणमाह ॥ तस्मिन्निति ॥ स्पष्टं ॥ तस्मिन्हेमंते प्रथमे मासे मार्गशीर्षे उत्का उत्कंठायुक्ताः ॥ ४३ ॥

**ग० ॥ अथैकदा प्रगे व्रजवरकुमार्यः समुत्थाय हेमंतेऽपि माधवसद्भावोऽस्त्येवेति संसूचयंत्य इव श्रवणसुखदैः पिकनिनदैः प्रत्येकं समाव्हयंत्यः किसलयमृदुलभुजकनकलताः परस्परमुद्ग्रथ्य चरणनलिनधृतमणिगणप्रचुरनूपुरचारुसिंजित**

**साहाय्येन प्रियगुणान् गायंत्यः प्रेमभरमावहंत्य
स्सुमंथरगत्या कालिंदीस्नानायाऽभिसस्रुः ॥ १६ ॥**

अथेति ॥ अथैकदा व्रजकुमार्यः प्रगे प्रातःकाले ॥ सायं साये प्रगे प्रातरित्यमरात् ॥ समुत्थाय सुमंथरगत्या प्रत्येकाऽऽह्वानानंतरं तदागमनप्रतीक्षया प्रियगुणगानानुरोधेन प्रेमभराऽलसत्वेन चेत्येतैर्व्याख्यास्यमानविशेषणसूचितैर्हेतुभिरत्यंतमंदगत्या कालिंदीस्नानाय कालिंद्यां स्नातुं ॥ तुमर्थाच्च भाववचनादिति चतुर्थी ॥ अभिसस्रुर्निर्जग्मुरित्यन्वयः ॥ कीदृश्यो व्रजकुमार्यः ॥ श्रवणसुखदैः कर्णसुखदैः ॥ पिकेति ॥ कोकिलसदृशध्वनिभिः प्रत्येकं समाह्वयंत्यः आकारयंत्यः ॥ अत्रोत्प्रेक्षते ॥ हेमंतेऽपीति ॥ हेमंतेऽपि माधवसद्भावो वसंतसद्भावः श्रीकृष्णे सद्भावश्चाऽस्त्येवेति सम्यक् सूचयंत्य इव ॥स्वीयपिकसदृशनिनदैः पिकध्वनिविशिष्टवसंतसमयं सूचयंत्य इवेत्यर्थः ॥ पुनः कीदृश्यः ॥ चरणेति ॥ चरणकमलेषु धृतानां मणिगणप्रचुराणां नूपुराणां सिंजितस्य ध्वनेः साहाय्येन प्रियस्य श्रीकृष्णस्य गुणान् गायंत्यः ॥ गानादौ वीणादिध्वनिसाहाय्यवत् प्रियगुणगाने नूपुरध्वनिसाहाय्यं बोध्यं ॥ पुनःकीदृश्यः ॥ प्रेमेति॥ स्नेहाऽतिशयं धारयंत्यः॥ किंकृत्वा॥किसलयेति॥ किसलयवत्पल्लववन्मृद्व्यो या भुजरूपाः कनकलतास्ताः परस्परमन्योन्यं उद्ग्रथ्य ॥ अन्योन्यं भुजान् धृत्वेत्यर्थः ॥ अत्र भुजे कनकलतातादात्म्येन सौंदर्यवत्वं तत्रैव किसलयमृदुलेति विशेषणेनसुखदत्वं च सूचितं ॥ १६ ॥

**प० ॥ पुलिनसुभगदेशं ताः कुमार्यः प्रहर्षान्नलि**



**नरुचिरगंधैः पूरितं प्रापुरस्याः ॥ मलिनजनसुमु
क्तित्यागदक्षोत्तमाया बलिनमथवहंत्यः प्रेमपूरं
मनोज्ञाः ॥ ४४ ॥**

पुलिनेति ॥ अथ ताः कुमार्यः नलिनानां पद्मानां ये रुचिरा गंधा आमोदास्तैः पूरितं अस्याः कालिंद्याः संबंधिनं पुलिनरूपं सुभगं रमणीयं देशं प्रति प्रहर्षात् व्रताचरणपूर्वकं भगवन्मेलनोत्साहात्प्रापुः ॥ कीदृश्याःकालिंद्याः ॥ मलिनानां पापिनामपि जनानां सुष्ठु या मुक्तिस्तस्या यस्त्यागो दानं ॥ त्यागो विहापितं दानमित्यमरात् ॥ तद्विषये दक्षा गंगादयस्तासूत्तमा तस्याः ॥ बलिनं बलवंतं केनाऽपि प्रकारेणाऽनुच्छेद्यं प्रेमपूरं वहंत्यः ॥ तथा मनोज्ञा इति कुमारीणां विशेषणद्वयं ॥ मालिनी वृत्तं ॥ ४४ ॥

**कूले न्यस्य दुकूलानि विमलानि तदा द्रुतं ॥ बा
लास्ता वाहिनी वारि विविशुर्व्रतकर्शिताः॥४५॥**

कूलेइति ॥ स्पष्टं ॥ ४५ ॥

**सविता तेजस्वी ते यद्यपि कृष्णाऽसि कृष्णसंपर्का
त्॥ यमुने तेजोरूपान् करोषि भक्तान् पितुर्गुणा
न्नियतं॥ ४६ ॥**

अथ तत्कृतं श्रीयमुनास्तवमनुवदति ॥ सवितेति ॥ हेयमुने यद्यपि नाम्ना संबंधेन च ते सविता पिता सूर्यस्तेजस्वी हिरण्यवर्णः अस्ति तथाऽपि कृष्णसंपर्कात् कृष्णसंबंधात्त्वं कृष्णाऽसि नन्वेवं सति मयि पितृगुणः कोऽपि नाऽस्तीत्याऽऽशंकायामाहुर्गोप्यः॥तेजोरूपानित्या

दि॥भक्तान् तेजोरूपान् करोषि॥मुक्तिकाले जीवस्य ज्योतीरूपत्वात्॥एतच्च नियतं निश्चितं पितुर्गुणात् तेजस्विनः पितुः सूर्यस्य गुणात्॥एवंच निरंतरकृष्णसंबंधवती त्वमस्मदभिलषितकृष्णप्राप्तिसंपादने समर्थाऽसीति ध्वनितं ॥ ४६ ॥

**ग० ॥इदं निगद्य तीरे निमग्नासु सतीषु ॥१७॥**

इदमिति ॥ तीरे इदं निगद्य उक्त्वा पश्चाज्जले निमग्नासु सतीषु ॥ ॥ १७ ॥

**प० ॥सदंबडिंभोऽपि कदंबयोगान्नेत्रं पवित्रं हरिणेक्षणानां॥कृष्णोऽप्यहार्षीन्नहि चित्रमत्र संगे न दोषस्तु जने प्रदृष्टः॥ ४७॥**

सदंबेति ॥ सती अंबा माता यस्य स सदंबः सचाऽसौ डिंभो बालकः एवंविधोऽपि श्रीकृष्णः ॥ कदंबेति॥ कदंबाख्यवृक्षयोगात् ॥ श्लेषेण कद् कुत्सिता अंबा यस्य स कदंबः कुत्सितमातृकस्तस्य योगात् ॥ कड्डकार्कश्ये इत्यस्माद्दोपधात् क्विपि कद् इति रूपं बोध्यं ॥ कुमातृकः कदंबः स्यात्कदंबः सर्षपः स्मृतः ॥ कदंबो वृक्षभेदश्च कदंबो निर्गुणः पुमान् इत्यनेकार्थध्वनिमंजरी ॥ हरिणेक्षणानां गोपीनां पवित्रंनेत्रं वस्त्रं॥स्याज्जटांशुकयोर्नेत्रमित्यमरात् ॥ जात्यैकत्वादेकवचनं ॥ अहार्षीत् हृतवान् ॥ अत्रैवंविधवस्त्रहरणविषये चित्रमाश्चर्यं नहि ॥ हि यस्मात् जने लोके दोषस्तु संगेन हेतुना प्रदृष्टः सुप्रसिद्धः अस्ति ॥ अत्र जने इत्युक्त्या अजने भगवति वस्तुतो दोषाऽभाव इति ध्वनितं॥एवं च कुत्सितांबसंपर्कात् सदंबडिंभेनाऽपि श्रीकृष्णेन गोपीनां पवित्रव-



स्त्राऽऽहरणं कृतमिति भावः ॥ उपजातिर्वृत्तं ॥ ४७ ॥

**प० ॥ युग्मं ॥ शंबराण्यवगाह्य स्वान्यंबराण्यविलोक्य ताः॥ शंबरारिगुरुं दृष्ट्वा तं वरा नीप आस्थितं॥ ४८॥**

**ममज्जुर्लज्जया तस्य प्रियां कथयितुं द्रुतं ॥ तज्जले तत्कृतं चौर्यमत्र नेत्रोच्चयस्य किं॥ ४९॥**

वस्त्राहरणोत्तरं गोपीभिः किं कृतमित्यपेक्षायामाह ॥ शंबराणीत्यादियुग्मेन ॥ वराः श्रेष्ठास्ता गोप्यः शंबराण्युदकानि ॥ निरक्षीरांऽबुशंबरमित्यमरात् ॥ जलबाहुल्यसूचनाय बहुवचनं ॥ अवगाह्य स्वान्यंबराणि तीरनिहितानि वस्त्राण्यविलोक्य ॥ शंबरारिगुरुं शंबरारिः कामः ॥ शंबरारिर्मनसिज इत्यमरात् ॥ तस्य गुरुं पितरं तं श्रीकृष्णं नीपे कदंबे आस्थितं दृष्ट्वा लज्जया तज्जले यमुनाजले द्रुतं शीघ्रं ममज्जुर्मग्ना बभूवुः ॥ अत्रोत्प्रेक्षते ॥ अत्र तीरे तत्कृतं तेन श्रीकृष्णेन कृतं नेत्रोच्चयस्य वस्त्रसमूहस्य चौर्यं तत्प्रियां यमुनां प्रति कथयितुं किं ॥ ४८ ॥ ४९ ॥

**ग०॥ अथो पाथोधरप्रभदिवानाथतनयापाथःप्रवेशप्रथ्यमानवेपथुविशिष्टाः स्वयमनाथा अपि नाथतामनुभवितुं व्रजनाथं ता अंबराणि न नाथुः॥ १८॥**

अथोइति ॥ अथो ताः गोप्यः व्रजनाथं श्रीकृष्णं प्रति अंबराणि वस्त्राणि ननाथुः याचंते स्म ॥ नाथतेराशिषि नाथ इत्याशि-

ष्येवाऽऽत्मनेपदनियमादत्र परस्मैपदं ॥ याचनार्थकत्वाच्च द्विकर्मकत्वं ॥ किं कर्तुं ॥ स्वयमनाथा अपि वस्त्रहरणेन दीना अपि ॥ यद्वा कुमारीत्वादजातपतिका अपि ॥ श्लेषेण न नाथंति याचंते इत्यनाथा अयाचिका अपि ॥ नाथतां श्रीकृष्णप्राप्यानाथवत्तां ॥ अर्शआद्यच् ॥ श्लेषेण याचकत्वं च अनुभवितुं ॥ विवाहश्च विवादश्च समयोरेव शोभत इत्युक्ते भगवता नाथेन साम्यार्थं स्वस्याऽपि नाथत्वं प्रकटीकर्तुमिति भावः ॥ कीदृश्यस्ताः॥ पाथोधरेति ॥ पाथोधरः सजलमेघस्तद्वत्प्रभा कांतिर्यस्यैवंविधं नीलमिति यावत् यद्दिवानाथस्य सूर्यस्य तनयाया यमुनायाः पाथ उदकं तस्मिन् यः प्रवेशस्तेन प्रथ्यमानो विस्तार्यमाणो यो वेपथुः कंपः शीतहेतुकस्तद्विशिष्टाः ॥ १८ ॥

**प० ॥ नेत्राऽऽनंदकरो भव त्वमधुना शीताऽर्दितानां सखे नेत्राऽऽनंदकरोऽसि तेन शिरसा दास्यं वहामाऽनिशं ॥ ईदृग्वाक्सुधया ऽऽप्लुतो हरिरथो वाच प्रहस्य द्रुतं नीरात्तीरगता भवंतु यदि मे दास्यं गताः सांप्रतं॥ ५० ॥**

याचनप्रकारमेवाह ॥ नेत्रानंदेति ॥ हे सखे श्रीकृष्ण यतस्त्वं नेत्राऽऽनंदकरो दर्शने सति लोचनयोरानंदकर्ता सहजसुंदरइत्यर्थः ॥ एतेन श्यामसुंदर ते दास्य इत्यत्रत्यसुंदरेति संबोधनपदं व्याख्यातं ॥ श्लेषेण वस्त्रप्रयुक्ताऽऽनंदकर्ता चाऽसि ॥ अतः अधुना शीतार्दितानां ॥ अस्माकमितिशेषः ॥ नेत्राऽऽनंदकरः वस्त्रप्रयुक्तानंदकर्ता भव ॥ वस्त्रप्रदानेन तत्प्रयुक्तशीतनिवारणलज्जासंरक्षणादिना आनंदकर्ता भवेति यावत् ॥ वस्तुतस्तु ॥ हे अशीत स्वीयानां मनोरथपूरणादावनलस ॥ शीतं हिमगुणे क्लीबं शीतताऽलसयोस्त्रिषु इति मेदिनी ॥ यतस्त्वं दर्शनमात्रेणाऽस्माकं नेत्रानंदकरोऽसि अतः अर्दितानां त्वद्विरहपीडितानां नः नेत्राऽऽनंदकरः नेतुर्नायकस्य संबंधी य आनंदो विहारादिप्रयुक्तस्तत्कर्ता भव अस्माकं पतिर्भवेत्यर्थः ॥ कुमारीत्वेन लज्जावशात् श्लेषेण निगूढैवमुक्तिः ॥ युक्तश्चाऽयमर्थः ॥ कृष्णः पतिर्भवत्वित्युद्देशेनैव तासां व्रते प्रवृत्तेः ॥ अतएव नंदगोपसुतं देवि पतिं मे कुरु ते नम इति तासां कात्यायनीप्रार्थनावाक्यं ॥ तेन वस्त्रदानेन पतिभावेनच दास्यं अर्थात्तवैव अनिशं निरंतरं शिरसा वहाम धारयाम ॥ प्रार्थने लोट् ॥ स्त्रीभिर्निरंतरं दास्यवहनं हि पतित्वे सत्येव संभवतीत्यतो वस्तुतः पतिभवनप्रार्थनैव युज्यते ॥ एतदुपरि भगवदुत्तरमनूदितुं कविराह ॥ ईदृगिति ॥ अथ ईदृक् अनुपदोक्ता या वाक्सुधा गोपीनां वचनामृतं ॥ श्लेषादिचमत्कृतत्वात्स्वाभीष्टत्वाच्च वाचः सुधातादात्म्यं ॥ तया आप्लुतः समंतादमृतेन स्नात इव तच्छ्रवणेन सर्वत आनंदमग्नः ॥ अत्राऽऽप्लुत इत्युक्त्या तच्छ्रवणेन भगवतः स्वेदाख्यसात्विकभावोऽपि युज्यते ॥ एवंविधो हरिः प्रहस्योवाच॥ हरिरित्यनेन तासामार्तिहरणोद्युक्तत्वं प्रहस्येत्यनेन च पूर्वोक्ततदभिप्रेतार्थद्वयज्ञानं उपक्रांतव्रतफलवितरणोन्मुखत्वं च ध्वन्यते ॥ यदुवाच तदन्वाह ॥ द्रुतमित्यादि ॥ सांप्रतमिदानीं ॥ भवत्य इतिशेषः ॥ यदि मे दास्यं गतास्तर्हि द्रुतं शीघ्रं नीरात् नीरं विहाय ॥ ल्यब्लोपे पंचमी ॥ तीरगता भवंतु ॥ जलान्निर्गत्य तीरमागच्छतेत्यर्थः ॥ स्वाम्याज्ञापालनस्यैव दासधर्मत्वादित्यर्थः ॥ द्रुतमित्यने-

न स्त्रीणामिदमनुचितं इत्यादिशंकामकत्वैवाऽऽगम्यतामिति सूचितं ॥ शार्दूलविक्रीडितं वृत्तं ॥ ५० ॥

**तच्छ्रुत्वाऽनंगसंदिष्टाः पाणिभ्यां स्ववरांगकं ॥ आच्छाद्याऽनंगतातस्य सामीप्यमभजन् हि ताः॥५१**

तच्छ्रुत्वेति ॥ ताः शीतार्दिताः कुमार्यः तद्भगवद्वचनं श्रुत्वा स्ववरांगकं स्वकीयं गुह्यांगं ॥ वरांगं मूर्धगुह्ययोरित्यमरात् ॥ तत्पाणिभ्यामाछाद्य अनंगतातस्य मूर्तिमत्कामजनकस्य दर्शनमात्रेण स्त्रीणां मदनोत्पादकस्य वा भगवतः सामीप्यं अभजन् हि ॥ नीरादुत्तीर्य तत्समीपं गतवत्य एवेत्यर्थः ॥ अवधारणार्थकहिशब्देन विवस्त्राभिरस्माभिः परपुरुषसविधं कथं गंतव्यमित्यादिशंकाव्यावृत्तिर्बोध्यते ॥ यद्वा हिता इत्येकं पदं ॥ स्वाऽऽज्ञाकारित्वेन भगवतो ऽभीष्टाइत्यर्थः ॥ अस्मिन्पक्षे कुमार्य इति शेषः ॥ समीपगमने हेतुगर्भं कुमारीर्विशिनष्टि ॥ अनंगेति॥ अनंगेन कामेन संदिष्टा आज्ञप्ताः ॥ यस्य दास्यमंगीकृतं तत्तनयेन दत्ताज्ञत्वादेव तत्समीपमगमन्निति युक्तमेवेति भावः ॥५१॥

**कृष्णस्तदाऽऽहश्टणुत व्रतकर्मभंग आसीत् प्रिया वसनहीनतया प्रविष्टाः ॥ अंतर्जले तदधुना किल तत्प्रपूर्त्यै भासां निधिं ननु नमस्कुरुताऽऽशु सर्वाः ॥५२॥**

ततः कृष्णोक्तमनूदितुमाह ॥ कृष्णइति ॥ तदा स्वसमीपाऽऽगम-





नसमये कृष्ण आह ॥ तदाह ॥ श्टणुतेति ॥ हेप्रिया यूयं श्टणुत ॥ किमित्यतआह ॥ वसनेत्यादि ॥ यतो वसनहीनतया वस्त्राराहित्येन उपलक्षिताः सर्वा यूयमंतर्जले प्रविष्टा अतो व्रतभंगः आसीत् किलेति निश्चये ॥ नग्नतया स्नानस्य निषिद्धत्वादितिभावः ॥ तत्तस्मादधुना तत्प्रपूर्त्यै व्रतपूर्त्यर्थं भासां निधिं सूर्यं आशु नमस्कुरुत ॥ नन्वित्यनुज्ञायां ॥ प्रिया इति संबोधनेन तासां मनोरथपूरणौत्सुक्यं ध्वनितं ॥ वसंततिलका वृत्तं ॥ ५२ ॥

**तास्तदाज्ञानुसारेण चक्रुस्तत्प्राप्तिलालसाः ॥ सर्वं शुद्धधिया शीघ्रं कुमार्यः कंजलोचनाः॥ ५३ ॥**

अथ गोपिका एवं कृष्णवचनं श्रुत्वा कृष्णप्राप्तिलालसतया शुद्धबुध्या कृष्णोक्तं सर्वं तदाज्ञया शीघ्रं कृतवत्य इत्याह ॥ ताइति ॥ स्फुटं ॥ शुद्धब्रह्मणः श्रीकृष्णस्य प्राप्तिः शुद्धबुद्धिमंतरा न भविष्यतीति तथा बुध्या सर्वं चक्रुरितिभावः ॥ ५३ ॥

**यद्यपि दातुमशक्यं वदान्यधीरैरिहांऽबरं किंचित्॥ प्रादात्प्रभुः सलीलं तदेव ताभ्यः स नेत्रसुखदो द्राक्॥ ५४ ॥**

एवं कृते भगवता कृतं वरप्रदानमाह ॥ यद्यपीति ॥ यद्यपि वदान्यधीरैर्दानशूरैरपि पुरुषैः किंचिदपि स्वल्पमपि अंबरमाकाशं दातुमशक्यं अरूपत्वात् तथाऽपि नेत्रसुखदः नेत्रयोर्लोचनयोः सुखदः पक्षे वस्त्रप्रयुक्तसुखदः सः श्रीकृष्णः यतः प्रभुः समर्थः अतस्ताभ्यो गोपीभ्यो द्राक् शीघ्रं तदेवांऽबरमाकाशमेव वस्तुतो वस्त्रमेव सलीलं अनायासेनेति यावत् प्रादात् ॥ यच्च सर्वैर्दातुम-

शक्यं तत्प्रभुरेव स्वभक्तेभ्यो ददातीति भावः ॥ अंबरं न द्वयोर्व्यो-
म्नि सुगंध्यंतरवस्त्रयोरितिमेदिनी ॥ ५४ ॥

**तस्माद्गृहीतनेत्रा अप्यासंस्तद्दत्तनेत्रकाः ॥ तत्प्री तिनेत्रसंबद्धाः कृच्छ्रात् गेहं समाययुः॥ ५५ ॥**

तस्मादिति ॥ तस्मात् श्रीकृष्णात् गृहीतनेत्रा अपि गृहीतवस्त्रा अ-
पि ताइतिशेषः गोप्यः तद्दत्तनेत्रकाः तस्मै श्रीकृष्णाय दत्तानि
नेत्रकाणि वस्त्राणि याभिस्ता एवंविधा इति विरोधः ॥ परिहार-
स्तु तस्मात् श्रीकृष्णात् गृहीतं नेत्रकं सस्नेहा दृष्टिर्याभि-
स्ताः ॥ तस्मै श्रीकृष्णाय दत्तानि तदेकदर्शनाय व्यापारितानि-
नेत्राण्येव नेत्रकाणि लोचनानि याभिस्ताः ॥ उभयत्राऽपि बहु-
व्रीहौ कृते आपः सुपःपरत्वाद्सुप इति निषेधात्प्रत्ययस्थादिती-
त्वंन॥ यद्वा तस्मै श्रीकृष्णाय दत्तानि नेत्राणि कं च आलापादि-
सुखं याभिस्ता एवंविधा इति॥ आलापादिसुखाऽपेक्षया तत्कार-
णत्वेन नेत्रसंमेलनस्य प्रथममुपस्थितत्वाद्दीयमाननेत्राणामभ्य-
र्हितत्वात्पूर्वनिपातः ॥ यद्वा दत्तं नेत्रकं नयनसुखं सलज्जकटा-
क्षादिभावप्रदर्शनपूर्वकं याभिस्ताः ॥ एतेन चक्षूरागाख्या प्रथमा-
वस्था सूचिता ॥ ततः ॥ तदिति ॥ तस्मिन् श्रीकृष्णे या प्रीतिः
स्नेहः सैव नेत्रं रज्जुस्तेन सम्यक् बद्धाः अतएव कृच्छ्रादवलोक-
नादिप्रतिबंधप्रयुक्तेन महता संकटेन गेहं स्वगृहं समाययुः ॥ ने-
त्रशब्दस्य मंथगुणवाचकत्वेन सामान्यरज्जुवाचकत्वाभावेऽपि बंध-
नसाधनत्वमस्त्येव ॥ ५५ ॥

**ग० ॥ अतः परमनेकाऽर्भकैः सह भूरिभूमिरुहभ**



**रितं त्वरितं काननमुपेत्य॥ १९॥**

अथ यज्ञपत्नीभ्योऽन्नयाचनलीलां वर्णयितुमुपक्रमते ॥ अतःपर-
मिति ॥ स्पष्टं ॥ १९ ॥

**प० ॥ सुतापयःपोषितवृक्षवर्गं संश्लेष्टुमर्यम्णि करैः प्रवृद्धे॥ छायामधिष्ठाय हरिर्हि तेषां बलान्वितस्तान् प्रशशंस तस्मिन्॥ ५६॥**

सुतेति ॥ तस्मिन्वने अर्यम्णि सूर्ये सुतायाः स्वतनयाया यमुना-
याः पयसा जलेन पक्षे दुग्धेन पोषितो यो वृक्षवर्गो वृक्षसमूह-
स्तं संश्लेष्टुं दौहित्रस्नेहादालिंगितुं करैः किरणैः पक्षे हस्तैः प्रवृद्धे
सति बलान्वितो बलरामसहितो हरिरुक्तप्रकारेण स्वस्याऽप्यप-
त्यत्वसंबंधं मनसि विभाव्येव तेषां वृक्षाणां छायामधिष्ठाय ता-
न् प्रशशंस श्रीभागवतोक्तप्रकारेण स्तुतवान् ॥ उपजातिर्वृत्तं ॥
॥ ५६ ॥

**विश्वंभरं समवलोक्य भिया क्षुधा किं तद्बालको दरदरीं प्रविवेश तूर्णं ॥ तत्पीडया व्यथितचेतस एत्य ते तं त्वार्तं समाजगदुरीश नु देहि भोज्यं॥ ॥५७॥**

विश्वंभरमिति ॥ क्षुधा॥ हलंताद्वाप्॥विश्वं बिभर्तीति विश्वंभरस्त-
मखिलविश्वक्षुन्नाशकं श्रीकृष्णं समवलोक्य भिया भयेन ॥ त-
दिति ॥ तस्य विश्वंभरस्य सहायभूता ये बालका गोपालास्ते-
षामुदरदरींप्रति तूर्णं प्रविवेश किमित्युत्प्रेक्षा ॥ लोके हि यो य-

तो बिभेति स स्वरक्षणार्थं तदीयान् प्रत्येव शरणं गच्छति गुहादौ च निलीय तिष्ठतीतिप्रसिद्धं ॥ततस्तत्पीडया अग्न्यादिवद्वस्तुशक्तिसिद्धया क्षुत्पीडया व्यथितचेतसस्ते गोपालबालकाः ॥ नु इत्यनुनये ॥ नु वितर्कापमानयोः ॥ विकल्पाऽनुनयातीते इति मेदिनीकोशात् ॥ तथाच अनुनयेन तं कृष्णं एत्य प्राप्य हे ईश भोज्यं देहीति आर्तं यथास्यात्तथा सम्यग्दयाजननयोग्यं अतिशयेन जगदुः वदंति स्म ॥ वसंततिलका वृत्तम् ॥ ५७ ॥

ग० ॥स तदा तदाकर्ण्याऽये वयस्या भवत्क्षुद्वाडवविनाशाय वाडववेगेन धृतवाडवानां वाडवानां सवसदनं प्रपद्य वाडवाऽऽस्या वासवमिव संस्तूय यूयं तान्याचध्वमित्याज्ञापयत्॥ २० ॥

सइति ॥ सः श्रीकृष्णस्तद्बालकोक्तमाकर्ण्य श्रुत्वा तदा तान् बालकान् इति आज्ञापयत॥इतिकिं॥अये वयस्याः यूयं॥भवदिति॥भवतां यः क्षुद्वाडवः क्षुद्रूपोऽग्निः॥वाडवो विप्रे अग्नौ चेति हैमात् ॥ तस्य विनाशाय शांतये धृतवाडवानां धृताग्नीनामाहिताग्नीनामित्यर्थः॥ वाडवानां ब्राह्मणानां सवसदनं सवोयज्ञः॥यज्ञः सवोऽध्वरो याग इत्यमरात् ॥ तस्य सदनं गृहं प्रति वाडववेगेन वडवानामिमे वाडवा अश्वाः ॥ वडवाऽश्वायां स्त्रीभेदे इति हैमात् ॥ तत्सदृशो यो वेगस्तेन प्रपद्य प्राप्य वासवं इंद्रं वाडवास्या इव अश्वमुखाः किन्नरा इव बर्हिर्मुखत्वादग्निमुखा देवा इव वा तान् ब्राह्मणान् संस्तूय सम्यक् स्तुत्वा याचध्वं अन्नमितिशेषः इति आज्ञापयत् ॥ २० ॥



प० ॥ गत्वाऽथ नत्वा स्तुतिभिश्च सम्यक् स्तुत्वा हि तां स्ते विनयेन विप्रान् ॥ अन्नं व्यनाथन्ननु तेऽपि रोषान्निःसारयामासुरिमान् विमूढा॥:५८॥

गत्वेति ॥ अथ भगवदाज्ञानंतरं ते गोपास्तान् भगवन्निर्दिष्टान् विप्रान् ब्राह्मणान् प्रति गत्वा नत्वा चपरं सम्यक् स्तुतिभिः स्तोत्रैः स्तुत्वा च विनयेन अन्नं व्यनाथन् याचितवंतः॥ हि प्रसिद्धं ॥ अनु पश्चात् ॥ पश्चात्सादृश्ययोरन्वित्यमरात् ॥ तेऽपि ब्राह्मणा अपि विमूढा भगवत्स्वरूपाऽज्ञानवंतः अतएव रोषात् इमान् गोपान्निःसारयामासुः ॥ इंद्रवज्रा वृत्तं ॥ ५८ ॥

ग० ॥ ततस्ते क्षिप्रं विप्रैः क्षुरप्रप्रभां प्रकोपप्रहितां वाणीमाकर्ण्य जंघालतया संघशः पुनः कृष्णमभजन्बभणुश्चेदं अयि वयस्य पंडितंमन्यैः केवलकर्मकलुषबुद्धिभिः स्वार्थपरैर्द्विजैर्वयमवधीरिता इति ॥ तच्छ्रुत्वा शौरिस्तथाऽपि वयस्या ब्राह्मणेभ्यो मासूयध्वमित्यभाणीत्॥ २१ ॥

ततइति ॥ ते गोपाः ॥ विप्रैरिति ॥विप्रैर्ब्राह्मणैः प्रकृष्टकोपेन प्रहिता मुक्तामत एव क्षुरप्रप्रभां क्षुरप्राख्यबाणसदृशीं वाणीमाकर्ण्य श्रुत्वा जंघालतया अतिवेगवत्तया ॥ जंघालोऽतिजवइत्यमरात् ॥ पुनः क्षिप्रं संघशः कृष्णमभजन् प्रापुः ॥ इदं वक्ष्यमाणं बभणुश्च वदंति स्म च॥तदेवाऽऽह॥अयीति॥अयि वयस्य हेश्रीकृष्ण पंडितंमन्यैः पंडितमात्मानं मन्यंते पंडितंमन्यास्तैः पंडितत्वाऽभिमानवद्भि-

रित्यर्थः ॥ आत्ममाने खश्चेति खश्॥तथा॥केवलेति॥केवलेन भगवद्भावरहितेन कर्मणा यज्ञादिना कलुषा आविला बुद्धिर्येषां तैः तथा ॥ स्वार्थपरैः लिप्स्यमानस्वर्गादिरूपार्थतत्परैः द्विजैर्वयमवधीरितास्तिरस्कृता इति ॥ तदिति ॥ तद्गोपवाक्यं श्रुत्वा हे वयस्याः गोपाः तथाऽपि तैर्युष्मदवधीरणे कृतेऽपि ब्राह्मणेभ्यो मासूयध्वं तेषां गुणेषु दोषाविष्कारं मा कुरुतेत्यर्थः ॥ क्रुधद्रुहेत्यादिना संप्रदानत्वं ॥ इति अभाणीदुक्तवान् ॥ २१ ॥

**प० ॥कप्रत्यया द्विजा यस्मात्सर्वे सूत्रानुसारिणः॥**
**प्रवर्तंते स्वार्थएव ऋषिशिक्षावहाः सदा ॥ ५९ ॥**

असूयाया अकरणे हेतुमाह ॥ कप्रत्ययाइति ॥ यस्माद्धेतोः सर्वे द्विजा ब्राह्मणाः सूत्रानुसारिणः उपवीतानुसारिणः अथवा सूत्राणि कल्पसूत्राण्यनुसरंति तच्छीलाः सूत्रानुसारिणः कल्पसूत्राऽनुरोधेनैव सर्वकर्मकर्त्तारः॥ पक्षे सूत्राणि प्रागिवात्क इत्यधिकारपठितानि पाणिनि सूत्राण्यनुसरंति तत्शीलाः॥कप्रत्ययाः कशब्देन ब्रह्म तद्वाच्यो यो वेदस्तस्मिन् प्रत्ययो विश्वासो येषां ते कप्रत्ययाः॥ कं ब्रह्मेतिश्रुतेः ॥ को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे इत्यभिधानात् ॥ वेदस्तत्वं तपो ब्रह्मेति॥प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु इति चामराच्च ॥यद्वा के ब्रह्मणि प्रत्ययो येषां ते तथाविधाः ब्रह्मनिष्ठा इति यावत् ॥ पक्षे क इत्येवंरूपो यः प्रत्ययस्तद्धितप्रत्ययस्तद्रूपाः संति तस्माद्धेतोः सदा सर्वदा ऋषिशिक्षाऽऽवहाः ऋषीणां कल्पसूत्रकाराणां पाणिन्यादीनां च शिक्षामनुशासनमावहंतीति तथाविधाः संतः स्वार्थ एव प्रवर्तंते ॥ पूर्वोक्तपाणिनिसूत्रविहितः कप्रत्ययो यथा स्वार्थे एव प्रवर्तते तथैतेऽपि स्वार्थएव प्रवर्तंते ऽतो नैतद्दोषाऽऽवहमिति भावः ॥ ५९ ॥



**निष्किंचनत्वं नाथत्वं ब्राह्मणे सूत्रवेद्यता ॥ मय्य**
**प्यस्मिन्साऽक्षरत्वं तस्मान्मत्सदृशा हि ते॥ ६० ॥**

तत्रैव हेत्वंतरमाह ॥ निष्किंचनत्वमिति ॥ यतो ऽस्मिन् ब्राह्मणे मय्यपि च निष्किंचनत्वं दारिद्र्यं॥ पक्षे नास्ति किंचनाऽपि यस्य स निष्किंचनस्तस्य भावस्तत्त्वं ॥ यत्संबंधि किमपि नाऽस्तीति भावः ॥ संबंधस्य द्विनिष्ठत्वात्तस्य च द्वैतसत्वे एव संभावत् मम चाऽद्वितीयत्वेन मत्संबंधि किमपि नाऽस्तीत्यतो निष्किंचनत्वं मयीति निष्कर्षः ॥ तथाच श्रीमद्भागवते रुक्मिणीं प्रति भगवद्वाक्यं ॥निष्किंचना वयं शश्वदित्यादि ॥ तत्रैव रुक्मिण्या अपि तत्समर्थनपरं वाक्यं॥निष्किंचनो ननु भवान् न यतोऽस्ति किंचिदित्यादिच॥तथा॥नाथत्वं याचकत्वं संप्रति उपतापकत्वं वा॥पक्षे ऐश्वर्यवत्त्वं ॥ नाथृ नाधृ याञ्चोपतापैश्वर्याशीःषु इति धातुसूत्रात् ॥ तथा सूत्रवेद्यता सूत्रेण यज्ञोपवीतेनवेद्यता ॥ पक्षे सूत्रै र्व्यासमूत्रैर्वेद्यता ज्ञेयता ॥ तथा ॥ साक्षरत्वं विद्वत्त्वं ॥ पक्षे द्वाविमौ पुरुषौ लोके क्षरश्चाऽक्षर एव च ॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति गीतावाक्यादक्षरसंज्ञककूटस्थपुरुषरूपस्वाधिष्ठानसहितत्वं ॥ स्वस्योत्तमपुरुषत्वात्॥ अक्षरपुरुषोत्तमयोर्धामधामित्वाच्च ॥ तदुक्तं श्रीभागवते ॥ तदाहुरक्षरं ब्रह्म सर्वकारणकरणं ॥ विष्णोर्धामेति॥ एतत्सर्वं कठवल्लीमुंडकाद्युपनिषत्सु स्पष्टं॥ एतत्सर्वं अस्ति तस्मात्ते ब्राह्मणा हि निश्चयेन मत्सदृशाः संति॥अतो मयीव न ब्राह्मणेष्वसूया विधेयेति भावः ॥ ६० ॥

**अधुनातु ॥ प० ॥ उष्णजंघतया नूनं क्षुधोष्णाः संप्रयांतु तत् ॥ विप्रपत्नीः प्रनाधध्वं मदादेशोक्तिपूर्वकम् ॥ ६१ ॥**

अधुनात्विति ॥ श्लोकेऽन्वेति ॥ उष्णजंघतयेति ॥ हे गोपाः अधुनातु क्षुधोष्णाः क्षुधा दीप्ताः भवंत इति शेषः उष्णजंघतया शीघ्रवेगेनेत्यर्थः ॥ तन्नूनं यज्ञसदनमेव प्रयांतु ॥ नूनमित्यवधारणे ॥ नूनंतर्केऽर्थनिश्चयइत्यमरः ॥तत्र गत्वा किं कर्त्तव्यमिति चेत्तदाह॥ विप्रेति ॥ यूयमितिशेषः ॥ मदादेशोक्तिपूर्वकं कृष्ण एवमाज्ञापयतीति मदाऽऽज्ञाकथनपूर्वकं विप्रपत्नीः प्रति प्रनाधध्वं प्रसंगादन्नं याचध्वं ॥ ६१ ॥

**तदा तूर्णं समभ्येत्य तासामभ्यर्णमत्र ते ॥ भोज्यं व्यनाथन्विप्रस्त्रीः पूर्णब्रह्मानुमोदिताः ॥ ६२ ॥**

तदेति ॥ ते गोपाः पूर्णब्रह्मणा श्रीकृष्णेनाऽनुमोदिताः दत्तानुमोदनाः संतस्तदा श्रीकृष्णाऽऽज्ञासमकालं तूर्णं शीघ्रं अत्र यज्ञसदने तासां विप्रपत्नीनामभ्यर्णं समीपभागं प्रति अभ्येत्य विप्रस्त्रीः भोज्यं व्यनाथन्याचितवंतः ॥ ६२ ॥

**ततः॥ श्रुत्वाऽऽगतं सबलकृष्णमतीव हर्षान्नानारसान्नपरिपूरितपात्रहस्ताः ॥ नद्यो यथा जलनिधिं विनिवारिता अप्यादित्यजापुलिनमाययुरत्र सद्यः॥ ६३॥**





ततः गोपकृताऽन्नयाचनानंतरं ॥ श्रुत्वेति ॥ विनिवारिताः पत्यादिभिः ॥ आदित्यजापुलिनं यमुनापुलिनं ॥ सद्यः गोपकृतयाचनसमकालमेव ॥ अत्र अस्मन्निकटवर्तिनि देशे आगतं श्रुत्वेतिसंबंधः ॥ शेषंस्फुटं ॥ नद्यो यथा जलनिधिमित्यनेन नदीनां यथा समुद्रातिरिक्ता गतिर्नास्ति तथाऽस्माकमपि भगवद्व्यतिरिक्ता गतिर्नास्तीति बुद्ध्या गोपयाचनसमकालमेव पत्यादिनिवारणमनाऽऽदृत्याऽप्यागता इति सूचितं ॥ वसंततिलका वृत्तं ॥ ६३ ॥

**दृष्ट्वाऽतिसुंदरवरं नलिनायताक्षं तद्द्युतामिव विमातुमिहाऽऽत्तपद्मं ॥ धृत्वा हृदि प्रणयवश्यतयास्य दत्वा भोज्यं ययुर्गृहमितस्तदनुज्ञया ताः॥६४॥**

दृष्ट्वेति ॥ इह पुलिने नलिनवत्कमलवदायते अक्षिणी यस्य स नलिनायताक्षस्तं ॥ अतएवाऽतिसुंदरेषु वरो ऽतिसुंदरवरस्तं॥ तथा॥ तदिति ॥ तयोर्नेत्रयोर्या द्युता रम्यत्वं तां विमातुमिव कमलेन सह तोलयितुमिव आत्तपद्मं धृतकमलं ॥ यद्वा तासां यज्ञपत्नीनां द्युतां विमातुमिव लक्ष्म्या सह तोलयितुमिव आत्तपद्मं आत्ता अंगीकृता पद्मा लक्ष्मीर्येन तथाविधं ॥ तमितिशेषः ॥ श्रीकृष्णं दृष्ट्वा भोज्यं दत्वा अस्य कृष्णस्य प्रणयवश्यतया प्रेमवश्यतया ॥ प्रणयास्त्वमी ॥ विश्रंभयाञ्ञाप्रेमाण इत्यमरात् ॥ हृदि धृत्वा अर्थात् श्रीकृष्णं ताः विप्रपत्न्यः तदाज्ञया कृष्णाऽऽज्ञया इतो यमुनातीरात् गृहं ययुः ॥ वसंततिलका वृत्तं ॥ ६४ ॥

**वामा अप्यापुराश्चर्यं दाक्षिण्यं तेन कर्मणा ॥ युक्तं ते साग्निकाः सर्वे परितापं समाययुः ॥ ६५॥**

वामाइति ॥ तेन श्रीकृष्णायाऽन्नदानरूपेण कर्मणा वामा अपि सव्या अपि दाक्षिण्यं दक्षिणानां भावो दाक्षिण्यं सव्येतरत्वं आपुः ॥ आश्चर्यमेतत् ॥ वस्तुतस्तु ॥ वामाः स्त्रियः ॥ प्रतीपदर्शिनी वामेति स्त्रीपर्यायेष्वमरात् ॥ तेन कर्मणा दाक्षिण्यं सारल्यं औदार्यं वा ॥ दक्षिणे सरलोदाराविल्यमरात् ॥ आपुः॥ सर्वे ते ब्राह्मणास्तु यतः साग्निका अतः परितापमनुतापं पक्षे परित औष्ण्य बाधां च समाययुः युक्तमेतत् ॥ ६५॥

**खल्वयं पूर्णभावस्थितेः प्रभावः॥ प० ॥ पूर्णभा वस्थित्यभावात्प्रदोष इतिकथ्यते ॥ निष्प्रदोषत्व सिद्धेस्तस्यैव कारणमुच्यते॥ ६६॥**

खल्वित्ति ॥ अयं भगवदन्नदानपूर्वकदाक्षिण्यावाप्तिरूपः ॥ पूर्णेति ॥ पूर्णो यो भावः प्रेम तस्य या अवस्थितिस्तस्याः प्रभावः सामर्थ्यमस्ति ॥ इदमेव श्लेषमूलकाऽर्थांतरन्यासेन द्रढयति ॥ पूर्णभावेति ॥ यस्मात् भानां नक्षत्राणामवस्थितिः स्थितिः भाऽवस्थितिः पूर्णा चाऽसौ भावस्थितिश्च पूर्णभावस्थितिस्तस्या अभावस्तस्माद्धेतोः ॥यद्वा पूर्णा या भा चंद्रस्य सूर्यस्य वा प्रभा तस्या अवस्थित्यभावात् ॥ श्लेषेण पूर्णभावस्येश्वरविषयकपरिपूर्णप्रेम्णो या स्थितिस्तस्या अभावाद्धेतोः ॥ प्रदोषो रजनीमुखं॥ पक्षे प्रकृष्टो दोषो यस्य स प्रदोषः प्रकृष्टदोष युक्तः इति कथ्यते ॥ लोकैरितिशेषः ॥ प्रदोषे हि नक्षत्राणां वैरल्यस्य चंद्रसूर्ययोः प्रभाया अल्पत्वस्य वा प्रसिद्धत्वात् ॥ तत्तस्माद्धेतोर्निष्प्रदोषत्वसिद्धेः सैव पूर्णभावस्थितिरेव कारणं हेतुरुच्यते यदा पूर्णा



नक्षत्रस्थितिश्चंद्रसूर्ययोः पूर्णप्रभावस्थितिर्वा तदा प्रदोषत्वाभावः प्रसिद्धः ॥ ईश्वरविषये यस्य पूर्णप्रेमस्थितिः स प्रकृष्टदोषरहित इति कथ्यते ॥ यस्य सा नास्ति स प्रकृष्टदोषवानिति कथ्यते ॥ अत्रोभयत्रोदाहरणं विप्रा विप्रपत्न्यश्च ॥ ६६ ॥

**ग० ॥ अथ जातुचित्प्रतिवत्सरविधीयमानधरा धरवर्द्धकमखविधानोद्युक्तधेनुपधौरेयैरुपनंदप्रभृ तिभिः परीतं पितरं प्रहसन्निदं प्रभुः प्राऽवोचत्॥ ॥२२॥**

अथ गोवर्द्धनोद्धरणलीलां प्रस्तौति ॥ अथेति ॥ अथाऽन्नयाचनलीलानंतरं प्रभुः क्रोत्स्यमानेंद्राद्व्रजरक्षणसमर्थः श्रीकृष्णः जातु चित्कदाचित्॥ प्रतिवत्सरेति॥प्रतिवत्सरं प्रतिवर्षं विधीयमानोयोध राधराणां पर्वतानां वर्धकस्य छेदकस्य पक्षच्छेदकत्वादिंद्रस्य मखो यज्ञस्तद्विधाने उद्युक्ता ये धेनुपधौरेया गोपश्रेष्ठास्तैरुपनंदादिभिः परीतमावेष्टितं पितरं नंदं प्रति इदं वक्ष्यमाणं प्रावोचत् ॥ किं कुर्वन्॥प्रहसन् सर्वकारणं सर्वेश्वरं व्यापकं देवदेवं प्रत्यक्षसन्निहितमपि मां शिशुबुध्या ऽवज्ञाय मत्स्रष्टं मदंशभूतमेकदेशवर्तिनं लोकांतरस्थं परोक्षं स्वर्गमात्रेश्वरमिंद्रमेते महत्या श्रद्धया यजंतीति विचार्याऽतिहसन् ॥ यद्यप्यग्रे गोवर्द्धनयागः प्रवर्तितो नतु स्वयागस्तथापि शैलोऽस्मीति ब्रुवन् इत्यादिश्रीभागवतादिवचनैर्गोवर्द्धनस्य स्वाऽभिन्नत्वात्स स्वयागएवेत्यविरोधः ॥ २२ ॥

**प० ॥ भोभो पितः कथय कोऽद्य महोत्सवस्ते य ज्ञोचिताय बलये किल संस्क्रियंते ॥ अन्नादयो**

**ननु जनै स्सकलाः पदार्थाः का देवताऽर्चनविधौ विहिताऽत्र तस्मात् ॥ ६७॥**

यदुक्तवांस्तदाह ॥ भोभोइति ॥ भोभो पितः ते तवाऽद्य को महोत्सवः अस्तीति कथय ॥ एवं प्रश्नं विधाय स्वयमेव यज्ञोत्सवं संभावयन् आह॥ यज्ञोचितायेति ॥ ननु निश्चये ॥ किलेति संभावनायां ॥ प्रश्नाऽवधारणाऽनुज्ञाऽनुनयाऽऽमंत्रणे ननु ॥ वार्तासंभाव्ययोः किलेति चामरः ॥ ननु निश्चयेन यज्ञोचिताय बलये उपहाराय किल अन्नादयः सकलाः पदार्था जनैर्भवदादिभिः संस्क्रियंते तत्तदुचितसंस्कारेण सिद्धाः क्रियंते ॥ यतः पदार्थसंस्करणं यज्ञोचितं दृश्यते ऽतो भवतामयमुत्सवो यज्ञरूप एवेति निश्चीयते इति भावः ॥ एवं संभावनया सामान्यतो यज्ञं निश्चित्य विशेषं जिज्ञासुरुद्देश्यभूतदेवतामंतरा यज्ञस्याऽसंभवात्तां देवतां पृच्छति ॥ तस्मादिति ॥ यतोऽयं यज्ञस्तस्माद्धेतोरत्र यज्ञे अर्चनविधौ उद्देश्यभूता देवता काऽस्ति ॥ एतदपि कथयेति पूर्वस्यैवाऽनुषंगः ॥ वसंततिलका वृत्तम् ॥ ६७ ॥

**ततः ॥ सानंदं नंदनं नंदो नंदयन्निदमब्रवीत् ॥ वासवीयः सवोऽयं वै व्रजवासिसुखाय भोः६८**

एवं कृष्णवाक्यं श्रुत्वा नंदस्तमवादीदित्याह ॥ ततइति ॥ सानंदमिति ॥ नंदः नंदयत्येतादृशजिज्ञासापूर्वकप्रश्नकरणेनाऽऽनंदयतीत्यन्वर्थो नंदनः पुत्रः श्रीकृष्णस्तं प्रति सानंदं यथा स्यात्तथा नंदयन् सम्यगयं त्वया प्रश्नः कृत इति अभिनंदनेन प्रोत्साहयन् सन्निदं वक्ष्यमाणमब्रवीत् ॥ तदेवाह ॥ वासवीयइति ॥ भोः श्रीकृष्ण अयमारभ्यमाणः सवोयज्ञो व्रजवासिसुखाय वै वृष्टिद्वारा तृणादिसमृध्या गवादीनां सुखसंपादनार्थमेव वासवीयः वासवस्येंद्रस्याऽयं वासवीय इंद्रदेवताकः क्रियत इति शेषः॥गोधनानामस्माकं वृष्टिद्वारा तृणादिसंपादकेंद्रोद्देश्यकयज्ञकरणस्याऽऽवश्यकत्वादिति भावः ॥ ६८ ॥



**विकल्पोऽस्ति नाम्न्यस्य यज्ञस्य शश्वत्तथाऽत्र प्र कर्तुं विमृश्याऽऽशु नंदं॥ अवादीद्धरिर्वासवप्रौढग र्वं सुयुक्तामभिख्यां विधातुं तमेतत्॥ ६९ ॥**

एवं नंदवाक्यं श्रुत्वा यज्ञविघातद्वारेंद्रगर्वं परिहर्तुं भगवानवादीदित्याह ॥ विकल्पइति ॥ हरिः श्रीकृष्णः आशु तं यज्ञविधानोद्यतं नंदमेतद्वक्ष्यमाणमवादीत् ॥ किंकृत्वा ॥ अस्य वासवस्य नाम्नि वासवइत्येवंरूपे यज्ञस्य विकल्पः वा वैकल्पिकः सवो यज्ञोयस्य स इति व्युत्पत्त्या शश्वन्निरंतरं आस्ति परंतु प्रतिवर्षं विधीयमानत्वात्तद्यागस्य सः विकल्प एतावत्पर्यंतं लोकाऽनुभवगोचरो नासीदतोऽत्रास्मिन्समये तथा प्रकर्तुं प्रक्रांतेंद्रयागस्य विकल्पमेव लोकानुभवगोचरीकर्तुं विमृश्य विचार्य ॥ विकल्पे ह्यंशद्वयं भावोऽभावश्च तत्रैतदवधि भावांश इंद्रयागे अभावांशश्च गोवर्द्धनयागे आसीत् इदानीं तद्वैपरीत्यं कर्तुं विचार्येति भावः ॥ पुनः किं कर्तुं ॥ वासवप्रौढगर्वं अभिख्यामर्थात् स्वनाम हरिरिति तां सुयुक्तां हरतीति हरिरित्यन्वर्थतया सम्यगुचितां कर्तुं ॥ इंद्रगर्वं परिहर्तुमित्यर्थः ॥ अत्रोत्तरत्रचभुजंगप्रयातं वृत्तं ॥ ६९ ॥

**सुधांधोऽधिपे ऽन्नस्य भोक्तृत्वमस्ति क्षमं किंत**

**था दृश्यता स्वःस्थितेऽस्मिन्॥ सद्वृद्धश्रवाः श्रोतृता नाऽस्य मंत्रोच्चयस्य प्रभुर्नास्ति दाने फलस्य॥ ॥ ७० ॥**

इंद्रोद्देशेन यद्यद्भवद्भिः क्रियते तत्सर्वं निष्फलमित्यभिप्रायगर्भां भगवदुक्तिमाह ॥ सुधांधोऽधिपेइति॥ सुधैवाऽमृतमेवांधोऽन्नं येषां तेषां देवानामधिपस्तस्मिन्निंद्रे ॥ भिस्सा स्त्रीभक्तमंधोऽन्नमित्यमरः ॥ अन्नस्य भोक्तृत्वं क्षमं योग्यं अस्ति किं अपितु अमृतभक्षके तस्मिन्नन्नभोक्तृत्वं युक्तं नास्ति ॥ तथा ॥ स्वःस्थिते स्वर्गस्थिते अस्मिन्निंद्रे दृश्यता अस्ति किं अपितु नास्तीत्यर्थः॥ तथा चोद्देश्यभूतदेवताया दर्शनमंतरा यजनमनुचितमिति भावः ॥ तथा ॥ यतः स इंद्रो वृद्धश्रवाः नामतोऽर्थतश्च वृद्धे जरायस्ते श्रवसी कर्णौ यस्य स तथाविधः अस्ति अतोस्य मंत्रोच्चयस्य श्रोतृता मंत्रसमूहश्रवणकर्तृत्वं नाऽस्ति अतः फलस्य कर्मफलस्य दाने प्रभुः समर्थो नाऽस्ति ॥ या हि देवता मंत्रान् शृणोति सैव प्रसन्ना सती फलं ददाति ॥ ततश्चेंद्रस्य सुधाशनत्वेनाऽन्नभोक्तृत्वाभावात् स्वर्गस्थत्वेन दृश्यत्वाऽभावान्मंत्रश्रोतृत्वाऽभावेन प्रसन्नतापूर्वकफलदानप्रभुत्वाऽभावाच्च तदुद्देश्यकयागकरणमनर्थकमिति भावः ॥७०॥

**किंतु॥ गोवर्द्धनोऽसौ वपुषाऽथ नाम्ना गुणैः स्वभावेन निजाऽभिपोषात् ॥ राजत्वमाप्तः सुभगः स्वतंत्रः स गोचरः स्यादिह गोचराणाम्॥ ७१ ॥**

एवं तर्हि काऽस्मदिष्टसाधनकर्त्री देवतेत्याशंक्याह ॥ किंत्विति ॥ गोवर्धनइति ॥ वपुषा शरीरेण गोः पृथ्व्या वर्धनो धारकत्वेन वृ-



द्धिकर्त्ता ॥ यद्वा स्वावयवभूतैस्तृणादिभिर्गवां धेनूनां वर्द्धकः ॥ अथच नाम्ना गोवर्द्धनसंज्ञकः ॥ अथच गुणैरौदार्यादिभिः गवां स्वस्तुतिरूपवाणीनां वर्धकः ॥ तथा ॥ सुभगः सुष्ठु भगमैश्वर्यं यस्य सः सुभगः निरतिशयैश्वर्यसंपन्नः ॥ एतेनाऽस्मन्मनोरथपूरकत्वमत्राऽस्तीति सूचितं ॥ तथा स्वतंत्रः अस्मद्रक्षणे परानपेक्षोऽसौ आधिदैविकस्वरूपेण विप्रकृष्टोऽपि गिरिवरः स्वभावेन हेतुभूतेन॥ निजेति ॥ निजानामस्माकमभितः सर्वतः पूतनादिनाशपूर्वकं पोषात् पोषणाद्धेतोः राजत्वमस्मन्निरूपितं प्राप्तः अस्ति ॥ स्वभावेनेत्यनेनाऽस्मद्रक्षणे स्वाभाविकी प्रवृत्तिस्तस्येति सूचितं ॥ तथाच तद्व्रजाभूतानामस्माकं तद्यजनमेवाऽऽवश्यकमितिभावः ॥ सः पूर्वोक्तगुणत्वेन परोक्षोऽपि गिरिराजः इह व्रजे गोचराणां गोषु चरंतीति गोचरा गोपास्तेषामस्माकमितिशेषः ॥ गोचरः प्रत्यक्षविषयः स्यात् ॥ उपजातिर्वृत्तं ॥ ७१ ॥

**तस्माद्गोगोपगोपीनामनामयहितैषिभिः॥ पूजनीयः प्रयत्नेन पर्वतानां प्रभुस्सदा॥ ७२ ॥**

एवमवश्योपास्यत्वे हेतून् प्रदर्श्य गोगोपगोप्यारोग्याद्यभिलाषुकैरस्माभिर्महता यत्नेन सर्वदा गोवर्धन एव पूजनीय इत्युपसंहरति॥ तस्मादिति ॥ अनामयं रोगाद्यनिष्टनिवृत्तिः ॥ हितमिष्टावाप्तिः ॥ अस्माभिरितिशेषः ॥ ७२ ॥

**ग० ॥ ततस्सद्रक्षकस्य द्राक्षासदृक्षामीदृक्षां गिरं गोरक्षकाः क्षिप्रमाश्रुत्य प्रतीत्य प्रहर्षाद्विप्रप्रभृतिप्रतोषकं क्रतुं कर्तुमुपचक्रमिरे॥ २३॥**

ततइति ॥ ततो भगवद्भाषणानंतरं सद्रक्षकस्य सतां साधूनांरक्षकस्य श्रीकृष्णस्य द्राक्षासदृक्षां मृद्वीकासदृशीं ईदृक्षां पूर्वोक्तां गिरं भगवद्वाचं क्षिप्रं शीघ्रं आश्रुत्यांऽगीकृत्य ॥ द्राक्षासदृक्षामित्यनेनोद्वेगाभावपूर्वकं प्रवर्तकत्वेन वक्तुरुत्तमत्वं सद्रक्षकत्वेनैतद्वचनस्यांऽगीकारयोग्यत्वं च ध्वनितं ॥ आश्रवोंऽगीकृतौ क्लेशे इति मेदिनी ॥ अत्रहेतुः ॥ प्रतीत्य विश्वस्य ॥ प्रहर्षात् अदृष्टपूर्वदेवताया भाविसाक्षाद्दर्शनौत्सुक्येन प्रकृष्टं हर्षं प्राप्य ॥ ल्यब्लोपे पंचमी ॥ विप्रप्रभृतीनां प्रभृतिशब्देन गवादीनां च प्रकर्षेण तोषकारकं क्रतुं भगवदुपदिष्टं गोवर्द्धनोद्देश्यकं यज्ञं कर्तुमुपचक्रमिरे प्रारब्धवंतः ॥ प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदं ॥ ॥ २३ ॥

**प० ॥ भूभृद्भट्टारकं ते प्रमुदितमनसा त्वर्चितुं गोकदंबं कृत्वा ऽग्रे गोपिकानां व्रजपरिभरितप्रांतभागास्तु गोपाः ॥ नंदं कृष्णं बलं चाऽऽययुरतिरभसात्तं परिक्रम्य चक्रुः पूजां प्रेम्णा तदग्रे धृतबलिनिचयास्तस्य दृग्गोचरस्य ॥ ७३ ॥**

भूभृदिति॥ गोपिकानां व्रजेन वृंदेन परिभरितः प्रांतभागो येषां ते तथाविधास्ते गोपाः प्रमुदितमनसा सहर्षाऽतःकरणेन ॥ प्रकृत्यादित्वात्तृतीया ॥ गोकदंबं गोसमूहं तथा नंदं कृष्णं बलं च अग्रे कृत्वा तं भगवता देवतात्वेन प्रतिपादितं हि प्रसिद्धं भूभृतां पर्वतानां यो भट्टारको राजा तं॥भट्टारको राज्ञि मुनौ सुरे इति हैमः॥





गिरिवरं गोवर्द्धनं अर्चितुं पूजितुं अतिरभसादतित्वरया आययुः॥ अथ तं गिरिं परिक्रम्य प्रदक्षिणीकृत्य प्रेम्णा तदग्रे गिरिराजाऽग्रे धृतबलिनिचयाः समर्पितान्नकूटाः संतो दृग्गोचरस्य दृग्विषयस्य तदानीं प्रत्यक्षीभूतस्येति यावत्॥ तस्य गिरिराजस्य पूजां चक्रुः॥ स्रग्धरा वृत्तम् ॥ ७३ ॥

**पूजासमुत्थसुभगाऽगरुधूमवर्गः स्वर्गं जगाम किल तत्पतये सुशोभां ॥ गोवर्द्धनोत्सवभवां वदितुं समोदो व्योमोत्पथेन विततः शुशुभे स भूयः ॥ ७४ ॥**

पूजेति ॥ पूजासमुत्थः अर्चनसमयेऽर्प्यमाणधूपादुत्पन्नो यः सुभगो रमणीयः ॥ यद्वा भगवत्पूजासंबंधित्वेनाऽत्यंतमाहात्म्यशाली ॥ भगं श्रीकाममाहात्म्येत्याद्यमरः ॥ एवंविधो योऽगरुधूमवर्गः सः विततः सर्वत्र प्रसृतः सन् शुशुभे ॥ भूयः पुनः स पूर्वोक्तो धूमः व्योमोत्पथेनाऽऽकाशसंबंध्युन्मार्गेण स्वर्गं जगाम ॥ स्वस्याऽतिप्रसरणे मार्गेण गंतुमनवकाशादुन्मार्गेण जगामेति भावः ॥ अत्रोत्प्रेक्षागर्भं धूमविशेषणमाह ॥तत्पतयइति॥तत्पतये स्वर्गस्वामिने इंद्राय गोवर्द्धनोत्सवभवां सुशोभां वदितुं संदेष्टुमिव समोदः सहर्षः॥ वस्तुतस्तु ससुगंधः॥ त्वद्यज्ञाऽपेक्षया गोवर्द्धनयज्ञे सुष्ठु शोभा संपन्नेति सूचकं सुपदं ॥ वदितुमित्यत्र वदसंदेशवचने इत्यस्मात्तुमन्॥ अत्रोत्तरत्र च वसंततिलका वृत्तम् ॥ ७४ ॥

**दीपावलिः प्रशुशुभे परितः स्थिता सा तं पद्मरागघटितोत्तमहारयष्टिः॥ किंवा द्युतिप्रभवचारुत**

**शांऽकुरालिस्तद्वर्ष्मणः किमु सुवर्णसुभाजनस्था॥ ॥ ७५ ॥**

धूपानंतरं क्रमप्राप्तां दीपावलिं वर्णयति ॥ दीपावलिरिति ॥ तं परितः गिरिराजस्य समंततः स्थिता सुवर्णसुभाजनस्था दीपावलिः प्रकर्षेण शुशुभे ॥ अत्रोत्प्रेक्षते ॥ पद्मरागेति ॥ पद्मरागैर्माणिक्यैर्घटिता एवंविधा उत्तमा हारयष्टिः किमु ॥ पुनरुत्प्रेक्षते ॥ किंवेति ॥ अथवा तद्वर्ष्मणः गिरिराजदेहस्य संबंधिनी द्युतिः कांतिस्तत्प्रभवा चारुतरा अतिसुंदरी या अंकुरालिः सा किमु ॥ ७५ ॥

**अयं किलाऽस्मानवितेति मत्वा स्वनामवाच्याव निधारकश्च ॥ तं ताः सुगोवर्धनभूधराऽग्रे क्रीडां प्रचक्रुर्मुदिता हि गावः॥ ७६ ॥**

गोवर्द्धनोत्सवे ऽवश्यकर्तव्यतया विहितं गोक्रीडनमाह ॥ अयमिति ॥ ताः गावः तं गोवर्धनं अयं गोवर्धनः अस्मानविता तृणादिभिरस्मद्रक्षकः ॥ यद्वा अस्मानविता इंद्रेण करिष्यमाणवर्षणाद्रक्षिष्यति ॥ अनद्यतनभविष्यति लुट् ॥ चपरं ॥ स्वेति ॥ स्वनाम गौरिति तद्वाच्या या अवनिः पृथ्वी तस्याः धारको धारणकर्तेति मत्वा किल मुदिताः सत्यः सुष्ठु शोभने गोवर्द्धनभूधरस्याऽग्रे हि अग्रभागे एव क्रीडां प्रचक्रुः ॥ उपजातिर्वृत्तं ॥ ७६ ॥

**ग० ॥ ततः परं पर्वतपरिवृढं पशुपपरिवृढा व्रज जनसहस्राऽऽनीतबलिसहस्रमाप्सातुं तान् रक्षितु मिवच विधृततत्संख्याकबाहुमहमपि पोषणकर**



**णसमर्थ इति सूचयंतमिव सजलजलदप्रभमा त्मानं दर्शयंतं परमसुभगं प्रभुं प्रसमीक्ष्य प्रसमा पितपूजाकृत्या मत्याहितहर्षाःप्रत्येकतद्भुजदंडेना ऽभयं ग्रहीतुमिव दंडवत्सहस्रप्रत्वः कृणेमुः॥ २४॥**

ततइति॥ततः परं गोक्रीडनानंतरं पशुपपरिवृढा गोपश्रेष्ठा नंदादयः पर्वतपरिवृढं गिरिराजं प्रसमीक्ष्य प्रत्यक्षतो दृष्ट्वा मत्याहितहर्षाः मतौ आहितो हर्षो यैरेवंविधाः ॥ तथा ॥ प्रसमापितं पूजाकृत्यं यैस्ते तथाविधाश्च संतः दंडवत्सहस्रकृत्वः प्रणेमुः ॥ कीदृशं ॥ व्रजेत्यादि ॥ व्रजजनानां सहस्रेणाऽऽनीतं यद्बलिसहस्रं तदाप्सातुं भक्षितुमिव तान् सहस्रसंख्यव्रजजनान् रक्षितुमिवच ॥ विधृतेति ॥ विधृतास्तत्संख्याकाः सहस्रसंख्याका बाहवो येन तथाविधं तथा अहमपि गिरिः पोषणकरणसमर्थ इति सूचयंतमिव सजलजलदप्रभं आत्मानं स्वस्वरूपं दर्शयतं ॥ यथा ॥ जलदो जगद्रक्षक एवमहमपि इति तत्प्रभावलंबेन सूचयंतमिवेति भावः ॥ तथा॥ परमसुभगं अनेकबाहुशालित्वेऽपि परमसुंदरं ॥ तथा ॥ प्रभुं निग्रहानुग्रहसमर्थं ॥ सहस्रकृत्वः प्रणेमुरित्यंशे उत्प्रेक्षते॥प्रत्येकेति ॥ एकैकतद्भुजदंडेनाभयं ग्रहीतुमिव ॥ २४ ॥

**ततः॥ प० ॥ भुक्त्वा बलिं निखिलगोपजनाऽऽहृतं तान् दत्वा ऽभयं रुचिरहास्यविराजितास्यः॥ कृत्वा कृपामिदमवोचदसौ प्रयांतु मत्वा प्रसन्नमथ मां मुदिताः स्वगेहं॥ ७७॥**

भुक्त्वेति ॥ ततस्तत्प्रणामानंतरं असौ गिरिराजः कृपां कृत्वा निखिलगोपजनाऽऽहृतं बलिं भुक्त्वा रुचिरहास्यसुशोभिताऽऽस्यः संस्तेभ्यो ऽभयं दत्वा ॥ भवंत इति शेषः ॥ अथ कात्स्र्न्येन ॥ मंगलाऽनंतराऽऽरंभप्रश्नकात्स्र्न्येष्वथो अथेत्यमरः ॥ भवंतो मां प्रसन्नं मत्वा मुदिताः संतः स्वगेहं प्रयांतु इतीदं तान् प्रत्यवोचदित्यन्वयः॥ अर्थः स्पष्टः ॥ वसंततिलका वृत्तम् ॥ ७७ ॥

**वंदारुजनताऽऽनंददानदक्षाऽनुमोदिताः॥ नंदाद्या स्समविंदंत सदनं वृंदशो मुदा॥ ७८॥**

वंदार्विति ॥ स्पष्टा योजना ॥ वंदारुरभिवादिका ॥ वंदारुरभिवादक इत्यमरात् ॥ एवंविधा या जनता जनसमूहस्तस्यै आनंददाने दक्षो निपुणः श्रीकृष्णस्तेनाऽनुमोदिताः संतः ॥ ७८ ॥

**ग० ॥ अथ वृंदारकवृंदाऽमंदवंदितेन महेंद्रेण गोपेंद्रतनयप्रेरितैर्गोपैः कृतविप्लुवां निजपूजामाज्ञाय रुषा ऽऽप्लुतसहस्रेक्षणेन तत्क्षणप्रणोदिताऽतिधूम्रप्रालयिकशंबरभृदाडंबराऽखंडनिबिडितसचापांऽबरझरच्छराऽऽसारसरणेन विशंकटनटद्विद्युच्छटोड्डामरमहःकदंबप्रसारेण प्रस्मरप्रखरतरसलिलशर्कराप्रकरप्रपातेन भुवनभीषणधैर्यपेषणनिपुणघनध्वानाऽऽकर्णनेन च महासाध्वसवंधुरा धेनुपा गाढध्वांतकवलितं प्रचंडभानुमप्यवलोक्य निजैकनाथं किल गोकुलनाथं शरणमुपे**



**त्येत्थंकारं गिरमुत्थापयामासुः॥ २५॥**

अथ स्वयज्ञविघातक्रुद्धमहेंद्रकृताऽतिवृष्टिभीता गोपा हरिं प्रार्थितवंत इत्याह ॥ अथेत्यादिना गद्येन॥ अथ गिरिराजयज्ञसमाप्त्यनंतरं॥ गोपेंद्रेति ॥गोपेंद्रतनयेन नंदतनयेन श्रीकृष्णेन प्रेरितैः इंद्रयज्ञविघातपूर्वकं गोवर्धनोद्देश्यकयज्ञे प्रवर्तितैर्गोपैः निजपूजां कृतविप्लवां कृतविघातां आज्ञाय रुषा क्रोधेन आप्लुतानि व्याप्तानि सहस्रमपीक्षणानि यस्यैवंविधेन ॥ वृंदारकेति ॥ वृंदारकाणां देवानां वृंदेन अमंदं बहुलं यथा तथा वंदितेन कृतवंदनेन महेंद्रेण तत्क्षणेति ॥तत्क्षणं स्वयज्ञविप्लवज्ञानसमकालमेव प्रणोदिताः प्रेरिता अतिधूम्राः प्रालयिकाः प्रलयकालसंबंधिनो ये शंबरभृतः उदकभृतो मेघाः॥ नीरक्षीरांबुशंबरमित्यमरात् ॥तेषां य आडंबरः समारंभः ॥ आडंबरः समारंभे गजगर्जिततूर्ययोरित्यभिधानात्॥तेनाऽखंडं यथा तथा निबिडितं व्याप्तं यत्सचापं सेंद्रधनुरंबरमाकाशं तस्माज्झरन्प्रवहन् यः शरासारः उदकधारासंपातः॥शरस्तेजनके बाणे दध्यग्रे नाशरं जले इति मेदिनीकोशात् ॥तस्य यत्सरणं प्राप्तिस्तया ॥ अत्राऽऽकाशस्य चापवत्त्ववर्णनेन तत्सकाशाच्छराऽऽसारस्य बाणवृष्टेः पतननिरूपणेन च तस्मिन् भयप्रयोजकताऽनुकूलं योधतादात्म्यं प्रत्याय्यते ॥ तथा ॥ विशंकटेति ॥ विशंकटं विशालं यथा स्यात् तथा नटंती नृत्यमिव कुर्वती या विद्युच्छटा तस्या उड्डामरो महान् यो महःकदंबस्तेजः समूहस्तस्य प्रसारेण प्रसरणेन ॥ तथा ॥ प्रस्मरेति ॥ प्रस्मर इतस्ततः प्रसरन् प्रकर्षेण खरतराणां कठिनतराणां सलिलशर्कराणां वर्षोपलानां यः प्रकरः समूहस्तस्य प्रपातेन ॥ तथा भुवने-

ति ॥ भुवनभीषणो लोकभयंकरः धैर्यपेषणनिपुणो धैर्यनाशनचतुरश्च यो घनानां मेघानां ध्वानः शब्दस्तस्याऽऽकर्णनेन श्रवणेनच महत् यत्साध्वसं भयं तेन बंधुराः नम्राः॥बंधुरः शोभने नम्रे इतिमेदिनी ॥ एवंविधा धेनुपा गोपाः प्रचंडभानुमपि प्रकर्षेण चंडाः क्रूरा भानवः किरणा यस्य तं सूर्यमपि ॥ गाढेति ॥ गाढं निबिडं यत्ध्वांतमंधकारस्तेन कवलितं ग्रस्तं एवंविधमालोक्य निजैकनाथं स्वीयमुख्यस्वामिनं शरणं रक्षितारं गोकुलनाथं श्रीकृष्णमुपेत्येत्थंकारमित्थं वक्ष्यमाणप्रकारेण गिरं उत्थापयामासुः ॥ अन्यथैवंकथमित्यादिना णमुल् ॥ निजैकनाथं गोकुलनाथमित्युभाभ्यां तस्मान्मच्छरणं गोष्ठमित्यादिना प्रतिपादितो भगवत्कृतः स्वीयत्वेन परिग्रहः सूचितः ॥ २५ ॥

**प० ॥ चरीकर्ति घोराऽऽरवं मेघमाला जरीहर्ति धैर्यं च विद्युद्विशाला॥ वरीवर्ति भीतिर्हृदब्जे जटाला सरीसर्ति वायुर्विषीदंति बालाः॥ ७९ ॥**

तां गिरमेवाह ॥ चरीकर्तीति ॥ मेघमाला मेघपंक्तिः घोरं भयंकरमारवं शब्दं चरीकर्ति अतिशयेन पुनःपुनर्वा करोति ॥ च परं ॥ विशाला विद्युद्धैर्यं जरीहर्ति अतिशयेन पुनःपुनर्वा हरति ॥ विद्युति विशालेति विशेषणं क्रूरत्वसूचनाय॥ वायुश्च सरीसर्ति अतिशयेन पुनःपुनर्वा सरति प्रचरतीत्यर्थः ॥ एतैः सर्वैः किं भवतीत्यत आह ॥ हृदब्जे हृत्कमले अर्थादस्माकं जटाला बहुला भीतिर्वरीवर्ति अतिशयेन पुनः पुनर्वा वर्तते ॥ बालाश्च विषीदंति पूर्वोक्तमेघाऽऽरवादिना खिद्यंति ॥ भुजंगप्रयातं वृत्तं ॥ ७९ ॥



**ग० ॥ एवं रीत्या भीत्याश्लिष्टक्लिष्टनैजजनवैक्लव्यमवेक्ष्य कृपाक्लिन्नमना मुकुंदः॥ २६॥**

**प० ॥ऋभुक्षस्तक्षितुं मंक्षु गर्वं पर्वतरक्षकं॥क्ष्वेल्योत्क्षिप्य करे दध्रे सद्रक्षणविचक्षणः॥ ८० ॥**

एवं गोपानां वाचं श्रुत्वा तद्रक्षणार्थं भगवान् यदकरोत्तदाह॥एवमिति गद्यसहितेन ऋभुक्षइति श्लोकेन॥ एवंरीत्या पूर्वोक्तरीत्या॥ भीतीति॥भीतिर्भयं तया आश्लिष्टाः क्लिष्टाश्च ये निजा एव नैजा जनास्तेषां यद्वैक्लव्यं विव्हलत्वं तदवेक्ष्य कृपाऽऽर्द्रीतःकरणः ॥ तथा ॥ सतां साधूनां रक्षणे विचक्षणः कुशलो मुकुंदः श्रीकृष्णः मंक्षु शीघ्रं ऋभुक्ष इंद्रस्य॥ऋभुक्षिन्शब्दात् षष्ठ्येकवचने ङसिभस्य टेर्लोप इत्यनेन टिलोपः ॥ आखंडलः सहस्राक्षऋभुक्षा इत्यमरः ॥ गर्वं तक्षितुं नाशयितुं पर्वतरक्षकं पर्वतोगोवर्द्धनस्तद्रूपो रक्षकस्तं ॥ यद्वा पर्वतानां रक्षकं गिरिराजमितियावत्॥ क्ष्वेल्या लीलया उत्क्षिप्य करे दध्रे ॥ स्वभक्तपीडनार्थं प्रवृत्तस्य स्वाऽग्रजस्याऽपींद्रस्य गर्वं परिहर्तुं तत्प्रतिपक्षिभूतं पर्वतपरिवृढं गोवर्द्धनमुद्धृत्य स्वभक्तरक्षणसाधनत्वेनांऽगीचकार भक्तैकपक्षपाती भगवानित्यर्थः ॥ ॥ २६ ॥ ८० ॥

**ततः परं ॥प०॥ महीध्रगर्ते स्थितिमत्र चक्रुर्गोगोपगोपीजनवत्सवर्गाः ॥ तदाज्ञया द्राक् सुधयाऽथ तृप्तास्तद्वक्त्रचंद्रोदितया भृशं ते॥ ८१ ॥**

ततःपरमिति ॥ गोवर्द्धनधारणानंतरं ॥ महीध्रेति ॥ ते प्रसिद्धा गो-

गोपगोपीजनवत्सवर्गाः तदाज्ञया श्रीकृष्णाऽऽज्ञया द्राक् शीघ्रं ॥ वृष्ट्याद्याकुलत्वाद्भगवद्विश्वासातिशयाच्चपर्वतपतनादिशंकामकृत्वेत्यर्थः ॥ अत्र श्रीकृष्णदर्शिते महीध्रगर्ते पर्वताधस्तनगर्ते स्थितिं चक्रुः ॥ अथ ॥ तदिति ॥ तस्य भगवतो यो वक्रचंद्रस्तस्मादुदितया उत्पन्नया सुधया सुखमत्र तिष्ठत भयमण्वपि न कुरुतेत्यादिवागमृतेन भृशमत्यंतं तृप्ता आसन् ॥ अनेन सप्तदिनपर्यंतं क्षुत्पिपासादिबाधाया निवृत्तिरपि सूचिता ॥उपजातिर्वृत्तं ॥ ८१ ॥

**ततः सप्त दिनानि॥ प० ॥ हरिर्हरिः पर्वतपक्षपाती बली सलीलं सलिलप्रदाता ॥ वलक्षनागोऽप्यहमेव नाऽन्य इतीर्ष्ययेवाऽति ववर्ष रुष्टः॥८२॥**

तत इंद्रः किमकरोदित्यत आह ॥ ततइति ॥ गोपादिप्रवेशानंतरं सप्तदिनानि ॥ अनयोः श्लोकेनाऽन्वयः ॥ हरिरिति ॥ततः हरिरिंद्रः रुष्टः सन् इति ईर्ष्ययेव सप्तदिनानि अतिववर्ष अतिवृष्टिंकृतवान् ॥ कालाध्वनोरत्यंतसंयोगइति द्वितीया ॥ यमाऽनिलेंद्रचंद्राऽर्कविष्णुसिंहांऽशुवाजिषु ॥ शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिष्वित्यमरः ॥ इतीति किं ॥ हरिः उभयत्र एतदभिधः स्वसेवकदुःखहर्ताच ॥ तथा॥पर्वतेति॥ पर्वतानां पक्षान् पातयति तच्छीलः पक्षे पर्वतस्य गोवर्द्धनस्य पक्षपाती ॥ तदुद्देश्यकयागप्रवर्तनात् ॥ तथा ॥ बली बलवान् सैन्ययुक्तोवा पक्षे बलरामाऽन्वितः पर्वतोद्धरणादतिशयितबलयुक्तो वा ॥ तथा ॥ सलीलं यथा स्यात्तथा सलिलप्रदाता उदकप्रदाता मेघस्वामित्वात् पक्षे त्रिविक्रमाऽव-





स्थायां चरणतो गंगारूपजलप्रदाता॥तथा॥बलक्षेति॥वलक्षोधवलः वलक्षो धवलोऽर्जुन इत्यमरात्॥एवंविधो नाग ऐरावताख्यो गजो यस्य सः पक्षे शय्याभूतःशेषाख्यो नागो यस्य स वलक्षनागः सोऽपि अहमेव नान्यः ॥ एवं सति मत्सदृक्षो मन्नामधारकोऽयमद्य कथमुदितइति ॥ उपेंद्रवज्रा वृत्तं ॥ ८२ ॥

**अथवा ॥ अक्ष्णां सहस्रं प्रविडंबितं करैः करेणुमस्तस्थमसौ पदेऽकुशं ॥ बिभर्ति वज्रं करगं घनत्विषं त्वितीर्ष्यया वर्षति वृत्रहा पुरा॥८३॥**

अथवा ॥ अक्ष्णामिति ॥ वृत्रहा इंद्रः ॥ अनेन स्वशत्रोर्वृत्रस्य भगवद्भक्तत्वेन भगवति तत्पूज्यत्वमपि ईर्ष्याकारणं सूचितं ॥ इति ईर्ष्ययेव पुरा पूर्वं वर्षति अवर्षीत् ॥ पुरि लुङ् चाऽस्मे इति पुरायोगे भूते लट् ॥ इतीति किं ॥ अनेनेति शेषः ॥ श्रीकृष्णेन अक्ष्णां सहस्रं अक्षिगता सहस्रसंख्येत्यर्थः ॥करैः प्रविडंबितं अनुकृतं ॥ गोपानां गोवर्द्धनस्वरूपदर्शने तावद्बाहुधारणात् ॥ तथा ॥ असौ श्रीकृष्णः करेणुमस्तस्थं ऐरावतमस्तकस्थं ॥ करेणुरिभ्यां स्त्रीनेभे इत्यमरः ॥ अंकुशं तथा करगं मत्करस्थितं वज्रं च पदे रेखारूपेण बिभर्ति ॥ तदुक्तं ॥ वज्रांऽकुशध्वजसरोरुहलांछनाऽऽढ्यमिति ॥ तु पुनर्घनानां अर्थान्मद्वाहनभूतानां त्विषं कांतिं बिभर्ति इति ॥ उपजातिर्वृत्तं ॥ ८३ ॥

**पवित्रनीरं ननु पंकनाशनं कलापिकं विष्णुपदच्युतं यतः॥ गिरित्रमस्ते श्रितकृष्णवर्त्मनि पपात युक्तं तदिदं न किं भवेत्॥८४॥**

इंद्रेण कृतमेतदयुक्तमिति श्लेषभंग्या युक्तमेव जातमिति प्रतिपादयन्नाह ॥ पविचेति ॥ पंकनाशनं कर्दमनाशकं ॥ बहुवृष्टिसत्वेकर्दमस्यप्रवहणात् ॥ तथा ॥ कलापिकं कलापिनां मयूराणां कं सुखं यस्मादिति कलापिकं ॥ मेघप्रादुर्भावे हि मयूराणामानंदोदयो भवतीति प्रसिद्धं ॥ एवंविधं पवित्रनीरं पविं वज्रं त्रायत इति पवित्र इंद्रस्तत्संबंधि नीरमुदकं ॥ इंद्रप्रेरितैर्मेघैर्वृष्टत्वात् ॥ एतेन वज्रधारणपूर्वकं मेघप्रेरणं तेन च वर्षणस्य क्रोधपूर्वकत्वं ध्वनितं ॥ यतो विष्णुपदच्युतं आकाशाद्गलितं अस्ति ॥ तस्माद्धेतोः श्रितकृष्णवर्त्मनि श्रितं कृष्णस्य वर्त्म मार्गो येनैवंविधे ॥ हरिदासवर्यत्वात्॥ यद्वा श्रितः कृष्णो यस्मिन्नेवंविधानि वर्त्मानि पंथानो यस्मिन्नेवंविधे॥तत्र सर्वदा सर्वत्र कृष्णसंचारात् ॥एवंविधे गिरित्रमस्ते गिरीन् पर्वतांस्त्रायत इति गिरित्रो गिरिराजस्तस्य मस्ते मस्तके पपात तदिदं युक्ततमं न भवेत्किमपितु भवेदेवेति काकुः ॥ आकाशाद्गलितस्योदकस्य पर्वतमस्तके पतनं युक्तमेव॥ अथवा विष्णोः पदाद्गलितस्य तस्य तत्संचाराऽधिकरणे पतनं युक्तमेवेति भावः ॥ अथच यतः ब्रह्मकमंडलुस्थितत्वात् स्वयमेव पवित्रनीरं शुद्धमुदकं अतएव पंकनाशनं पापनाशकं तदपि विष्णुपदच्युतं भगवच्चरणनिसृतगंगारूपमिति यावत् ॥ अनेनाऽतिपावित्र्यं बोधितं ॥ चरणं पवित्रमित्यादिश्रुतेः ॥ तथा कलापिकं कलाः पातीति कालपश्चंद्रः सोऽस्यास्ति शिरोभूषणत्वेनेति कलापी शंकरस्तस्य कं सुखं यस्मात्तत् ॥ गरलाऽग्नितापशामकत्वेन सुखकरमित्यर्थः॥ एवंविधं अस्ति तस्माद्धेतोः श्रितकृष्णवर्त्मनि श्रितस्तृतीयनेत्रे कृष्णवर्त्मा अग्निर्येनैवंविधे गिरित्रस्य कै-



लासाऽधीशस्य शंकरस्य मस्ते मस्तके पपात ॥ शेषं पूर्ववत् ॥ वंशस्थं वृत्तं ॥ ८४ ॥

**ग० ॥ अनंतरमंतरिक्षचरचक्रचक्रवर्ती क्रोधांऽधताप्रेरितघनघनाघनाऽनीकगाढोद्योगसाकल्यवैफल्यमालोक्य स्मयशैथिल्यात्तं निवारयामास ॥ ॥ २९ ॥**

अनंतरमिति ॥ दिनसप्तकानंतरं ॥ अंतरिक्षेति ॥ अंतरिक्षचरा देवास्तेषां यच्चक्रं समूहस्तस्य चक्रवर्ती राजा इंद्रः ॥ क्रोधेति ॥ क्रोधांऽधतया क्रोधप्रयुक्तविचारशून्यत्वेन प्रेरितं घनं निबिडं यत् घनाघनानीकं वर्षुकमेघसमूहः ॥ वर्षुकाब्दो घनाघन इत्यमरात् ॥ तस्य गाढो दृढो य उद्योगस्तस्य साकल्येन सामस्त्येन यद्वैफल्यं तत् आलोक्य स्मयशैथिल्यात् गर्वशैथिल्यात् ॥ स्मयो नाऽद्भुतगर्वयोरितिमेदिनी ॥ तत् मेघाऽनीकं निवारयामास ॥ ॥ २९ ॥

**प० ॥ प्रभुप्रभावमार्तंडप्रतापेन प्रतापितः॥ प्रलुप्तगतिकस्सोऽभूद्यतोऽसौ कौशिकः किल ॥ ८५॥**

प्रभ्विति ॥ स प्रसिद्धः असौ इंद्रः यतो हेतोः कौशिकः किल ॥ महेंद्रगुग्गुलूलूकव्यालग्राहिषु कौशिक इत्यमरात्॥नाम्ना कौशिक इति श्लेषेणोलूक इति प्रसिद्धः ॥अतो हेतोः प्रभोः श्रीकृष्णस्य यः प्रभावः प्रतापः॥स प्रतापः प्रभावश्च यत्तेजः कोशदंडजमित्यमरात् ॥ स एव मार्तंडः सूर्यस्तस्य प्रतापेन प्रकृष्टतापेन प्रकर्षेण

पीडितः सन् प्रलुप्तगतिकः प्रलुप्ता गतिर्ज्ञानं यस्य स प्रलुप्तगति-
कः इतिकर्त्तव्यतामूढः ॥ यद्वा प्रलुप्ता गतिरभ्युपायो गोकुल-
पीडनविषयको यस्येतिवा ॥ गतिः स्त्री मार्गदशयोर्ज्ञाने यात्रा-
ऽभ्युपाययोरिति मेदिनी ॥ उलूकपक्षे गतिर्गमनं ॥ एवंविधः अ-
भूत् ॥ सूर्यप्रतापेनाऽऽध्यादुलूको यथा लुप्तगतिको भवति तथा
भगवत्प्रतापप्रभावादिंद्रोऽपि तथाऽभूदिति भावः ॥ ८५ ॥

**अदभ्राऽभिमानात् परिभ्रष्टशंबायुधप्रेरिताऽभ्रै**
**र्भृशं भग्नदर्पैः॥नभोभागमालोक्य भासांनिधिः**
**प्रोज्झितं तं करैः पूजकः किं समागात् ॥ ८६ ॥**

इंद्रप्रेरणया मेघनिवृत्तौ निर्मले आकाशे सूर्यदर्शनमभूत्तदेवोत्प्रे-
क्षापूर्वकं वर्णयति ॥ अदभ्रेति ॥ भासांनिधिस्तु सूर्यस्तु भृशम-
त्यंतं भग्नदर्पैर्भग्नगर्वैः अदभ्रो बहुलो योऽभिमानस्तस्मात् ॥ अदभ्रं
बहुलं बह्वित्यमरः॥परिभ्रष्टेति ॥परिभ्रष्टो गलितो निरभिमान इति
यावत् एवंविधो यः शंबाऽऽयुधो वज्राऽऽयुध इंद्रः॥शतकोटिः स्व-
रुः शंब इति वज्रपर्यायेष्वमरः ॥ तेन प्रेरितानि यान्यभ्राणि मे-
घाः ॥ अभ्रं मेघो वारिवाह इत्यमरात् ॥ तैरुज्झितं त्यक्तं निरभ्र-
मितियावत् ॥ मेघगर्वस्येंद्रगर्वमूलकत्वात्तत्परिहारेतत्परिहारस्या-
ऽर्थसिद्धत्वमितिभावः ॥ एवंविधं नभोभागमालोक्य करैः किरणैः
श्लेषेण हस्तैः तं स्वाश्रयविमलीकरणेन कृतोपकारं श्रीकृष्णं
पूजकः समागात् पूजयितुं समागात् किमित्युत्प्रेक्षायां ॥ पूजक
इत्यत्र तुमुन्ण्वुलावित्यादिना ण्वुल् ॥ अकेनोर्भविष्यदाधमर्ण्य-
योरिति कृद्योगलक्षणषष्ठ्या निषेधात् कर्मणि द्वितीया ॥ भुजं-
गप्रयातं वृत्तम् ॥ ८६ ॥



**ऋभुक्ष आगर्वविनाशसाक्षिणं तं पूषणं तत्क्षण**
**मानिरीक्ष्य सः॥ नंदाऽन्वयाऽऽभूषण आह सत्वरं**
**सर्वे बहिस्त्यक्तभयाश्चरंत्विति॥ ८७॥**

ऋभुक्षइति ॥ आभूषयत्यतिशयेनाऽलंकरोतीत्याभूषणः नंदाऽन्व-
यस्याऽऽभूषणो नंदान्वयाऽऽभूषणः श्रीकृष्णः ऋभुक्ष इंद्रस्य आ-
गर्वविनाशसाक्षिणं आ सर्वतो गर्वविनाशे साक्षिभूतं ॥ सर्वक-
र्मसाक्षित्वात्तस्येति भावः ॥ अनेनेंद्रगर्वविनाशस्याऽविप्रतिपन्न-
त्वं सूचितं ॥ तं आकाशाधिष्ठितं पूषणं सूर्यं आनिरीक्ष्याऽवलो-
क्य सर्वे गोपादयस्त्यक्तभयाः संतः सत्वरं बहिश्चरंत्वित्याह ॥ उ-
पजातिर्वृत्तं ॥ ८७ ॥

**दंभोलिभृद्दंभगिरेर्दंभोलिर्दमने द्रुतं ॥ गोवर्द्धनध**
**रस्येदं करकंजमपि ध्रुवं॥८८॥**

इंद्रगर्वपरिहारमेव विरोधाऽलंकारविधया वर्णयति ॥ दंभोलीति॥
गोवर्द्धनधरस्य श्रीकृष्णस्य इदं गोवर्द्धनधारणे साधनत्वेन प्रत्यक्ष
तो दृश्यमानं वामं करकंजं करएव कंजं कमलं तदपि दंभोलिभृ-
तो वज्रधरस्येंद्रस्य यो दंभरूपो गिरिस्तस्य द्रुतं शीघ्रं दमने विष-
ये दंभोलिर्ध्रुवं वज्रमेवाऽऽसीत् ॥ अत्र दंभोलिभृदित्यादिना पर्व-
तभेदनसाधनधारकस्येंद्रस्य संबंधिनो गर्वपर्वतस्याऽतिदुर्भेद्यत्वं सू-
चितं ॥ अतिदुर्घटस्य तद्भेदनस्य च करकमलेन करणात् अचिं-
त्यं भगवत्सामर्थ्यं च ध्वनितं ॥ अत्राऽपि शब्दात् अतिकोमल-
त्वेन शिलोच्चयभेदनाऽसमर्थस्याऽपि कररूपकमलस्य तद्भेदन-
समर्थाऽतिकठोरवज्ररूपत्वेन वर्णनाद्विरोधालंकारः सूचितः॥८८॥

**महीध्रदेवगर्तात्ते देवदेवाऽनुमोदिताः ॥ बहिराग त्य मुदिताः सूषुः सौख्येन गोकुले ॥ ८९ ॥**

अथ भगवत्प्रेरणेन सहर्षास्ते गोपा गिरिगर्ताद्बहिर्निर्गत्य गोकुले सुखेन वसंति स्मेत्याह ॥ महीध्रेति ॥ ततो देवदेवेन श्रीकृष्णेना ऽनुमोदितास्ते गोपाः महीध्रदेवस्य गिरिराजस्य गर्तात्सौख्येन ब-हिरागत्य मुदिताः संतो गोकुले सूषुः निरुपद्रवतया वसंतिस्म ॥ ॥ ८९ ॥

**ततः सः ॥ क्षमाऽवलंबिता शक्रे मया त्वमपि ता दृशः ॥ क्षमातले भवेति द्राक् स्थापयामास तं गिरिं ॥ ९० ॥**

अथ भगवत्कर्तृकं पुनर्गिरिराजस्य स्वस्थानस्थापनं वर्णयति॥ततः सइति॥ क्षमेति॥ ततो गोपादीनां निर्गमनानंतरं॥हेगिरे मया शक्रे इंद्रे विषये क्षमा तदीयाऽपराधक्षांतिरवलंबिता स्वीकृता त्वमपि तादृशः क्षमाऽवलंबी क्षांत्यवलंबी वस्तुतश्च पृथ्व्यवलंबी भवेति॥ उक्त्वेति शेषः॥सः श्रीकृष्णः तं गिरिं क्षमातले पृथ्वीतले द्राक्स्था-पयामास ॥ महतोऽपि पर्वतस्य कराब्जादुत्तारणे आयासप्रयुक्त-विलंबाऽभावबोधकं द्रागिति ॥ ९० ॥

**रक्षिता रक्षताऽनेन क्षितिध्रच्छायया वयम् ॥ इत्यसौ पूजितः प्रेम्णा दध्यक्षतजलैर्जनैः ॥ ९१ ॥**

अथैवंलीलामात्रेण गोवर्द्धनस्योद्धरणं तेन च सर्वेषां रक्षणं य-थापूर्वं पुनस्तस्य स्वस्थानस्थापनं च दृष्ट्वा जगद्रक्षकपरदेवतात्व-



ज्ञानपुरःसरं कृष्णस्यैवस्वरक्षकत्वं निश्चित्य व्रजवासिनो दध्या-दिभिः प्रेम्णा तं पूजितवंत इत्याह ॥ रक्षिताइति ॥ रक्षता जग-तां रक्षकेणाऽनेन प्रत्यक्षतो दृष्टेन श्रीकृष्णेन कर्त्रा वयं कर्मभूताः क्षितिध्रच्छायया गोवर्धनच्छायया करणभूतया रक्षिताः स्म इ ति विचार्य जनैर्व्रजवासिभिः असौ श्रीकृष्णः दध्यक्षतजलैः सा-धनैः प्रेम्णा स्नेहेन हेतुना पूजितः॥पूजाप्रकारस्त्वत्रैव प्रसंगे तं प्रेमवे-गान्निभृता इति श्लोकसुबोधिन्यां दध्यक्षताद्भिरितिपूजासाध-नानि जलानि चरणक्षालनादौ दध्यक्षता अलंकारार्थे मार्जना-र्थावा आपः लौकिकी तद्देशप्रसिद्धेयं पूजा दध्ना तिलकं कृत्वा तदुपर्यक्षतान् स्थापयित्वा आप उपरि भ्रामयित्वा पिबंतीति श्रीमद्वल्लभाचार्यैर्दर्शितः ॥ ९१ ॥

**मेघं मुक्तजलं वीक्ष्य नेत्रौघोऽपि तथाऽभवत् ॥ स्व स्थानां भूस्थितानां च स्वाऽऽनंदाद्विमलस्तदा ९२**

मेघमिति ॥ तदा इंद्रगर्वनिराकरणपूर्वकगोपादिरक्षणकाले स्व-स्थानां स्वर्गस्थितानां चपरं भूस्थितानां विमलो निर्मलो नेत्रौ-घोऽपि मेघं मुक्तजलं वीक्ष्य स्वानंदात् सुष्ठु लोकविलक्षणो य आनंदस्तस्माद्धेतोः यद्वा स्वस्य भगवतः संबंधी य आनंदस्तस्मा-द्धेतोः तथा मुक्तजलोऽभवत् ॥ एतद्दृष्ट्वा सर्वेषामानंदाऽश्रुप्रवृत्ति-रासीदिति भावः ॥ स्वर्गस्थानामानंदकथनेन भगवतः स्वस्वामि-निष्ठदर्परूपदोषनिराकरणेन सत्यपि सामर्थ्ये राज्यादीनामनपहा रेणच उपकारकारित्वात् तस्मिन्निंद्रसखत्वज्ञानप्रयुक्तो मानभंग-हेतुकेर्ष्याभावः सूचितः ॥ अयमभिप्राय इंद्रस्य युज्यः सखेति श्रुतिव्याख्यायां विद्वन्मंडने स्पष्टः ॥ ९२ ॥

**निजनेतृकृताऽऽसाराऽसूययेव सुमोत्करं ॥ नंदना**
**ऽऽनीतमानंदाद्ववृषुः कस्य नंदनाः ॥ ९३ ॥**

देवकृतपुष्पवृष्टिमुत्प्रेक्षापूर्वकं वर्णयति ॥ निजेति ॥ कस्य प्रजापतेः कश्यपस्य नंदनाः पुत्रा देवाः ॥ कः प्रजापतिरुद्दिष्टइत्येकाक्षरः ॥ निजनेता स्वनायक इंद्रस्तेन कृतो य आसारो वृष्टिस्तत्प्रयुक्तया ईर्ष्ययेव नंदनवनानीतं सुमोत्करं पुष्पसमूहं आनंदाद्ववृषुः ॥ अस्मत्स्वामिना जलवृष्टिः कृता अस्माभिरपि काचिद्वृष्टिः कर्तव्येति बुध्या कुसुमानि ववृषुरित्यर्थः ॥ ९३ ॥

**ग० ॥ तदनंतरमसौ स्मयशिखरिशिखरादिव दिविषत्सरणितोऽपि समुत्तीर्य जाल्मो जंभभित् स्वाऽनुमोदितनैजजैत्रजलदजालजनितबहुलजलजंबालिते व्रजजनपदे निजपदे दध्रे ॥ ३० ॥**

अथेंद्रागमनमाह ॥ तदनंतरमिति ॥ गोपादीनामनाकुलस्थितिदर्शनानंतरं जाल्मः असमीक्ष्यकारी भगवन्महिमानमनवेक्ष्य गोकुलपीडनोद्यतत्वादविचार्यकारीति यावत् ॥ जाल्मोऽसमीक्ष्यकारीस्यादित्यमरः ॥ एवंविधो जंभभिदिंद्रः ॥ स्मयेति ॥ स्मयो गर्वः स एव शिखरी पर्वतस्तस्य यच्छिखरं तस्मादिव गर्वपर्वताद्यथाऽवतीर्णस्तथादिविषत्सरणितो देवमार्गादाकाशादपि सम्यगुत्तीर्य ॥ स्वाऽनुमोदितेति॥स्वेनाऽनुमोदितानिजाएव नैजाः स्वकीया जैत्रा जयनशीला ये जलदा मेघास्तेषां यज्जालं समूहस्तेन जनितमुत्पादितं यद्बहुलं जलं तेन जंबालितः संजातकर्दमस्तस्मिन्नेवंविधे व्रज-





जनपदे व्रजाख्ये देशे निजपदे स्वचरणे कर्मभूते दध्रे धृतवान् ॥ तत्राऽऽययावित्यर्थः ॥ ३० ॥

**ततः ॥ प० ॥ उपेत्य देवेंद्र उपेंद्रमेतं गोपेंद्ररूपं स्तुतिभिश्च सम्यक् ॥ अस्तौच्च गोलोकनिवासिनी गौः प्रेम्णा स्वसंतानयुता प्रहर्षात् ॥ ९४ ॥**

ततइति ॥ उपेत्येति ॥ ततो व्रजाऽऽगमनानंतरं देवेंद्रः स्वसंतानयुता गोलोकनिवासिनी गौः कामधेनुश्च एतं गोवर्द्धनोद्धारकत्वेन प्रत्यक्षं गोपेंद्ररूपं उपेंद्रमुपेत्य प्रेम्णा स्नेहेन प्रहर्षात् स्तुतिभिः स्तोत्रैः सम्यक् अस्तौत् तुष्टाव ॥ हर्षश्च स्वश्रीमदनाशपूर्वकभगवद्दर्शनप्रयुक्त इंद्रस्य गोश्च स्वसंतानरक्षणप्रयुक्तो बोध्यः ॥ उपजातिर्वृत्तं ॥ ९४ ॥

**ग० ॥ ततस्तावति पूतेन पयसा स्वःकरींद्रकरप्रकरकलितकनककलशगलगलितललितविमललखशैवालिनीसलिलैः किल तैश्च कलानाथकुलललामं तमभिषिच्य गोविंद इत्यभ्यधातां ॥ ततस्तदाऽऽदेशाद्देवेशः प्रीत्या स उभयरीत्या स्वस्थतामाससाद ॥ ३१ ॥**

ततइति॥ ततः स्तवनानंतरं तौ इंद्रकामधेनू कलानाथकुलललामं चंद्रवंशभूषणभूतं तं श्रीकृष्णं अतिपूतेनाऽतिपवित्रेण पयसा दुग्धेन ॥ तथा ॥ तैरतिपूतत्वेन प्रसिद्धैः ॥ स्वरिति ॥ स्वःकरींद्रः सप्तशुंडत्वेन प्रसिद्धऐरावतस्तस्य यः करप्रकरस्तेन कलितो धृतो

यः कलशस्तस्य गलाद्गलितानि ललितानि सुंदराणि विमलानि निर्मलानि यानि लेखशैवलिन्या देवनद्या मंदाकिन्याः सलिलान्युदकानि तैश्च प्रीत्या स्नेहेन अभिषिच्य गोविंद इति गाः पशूनिंद्रत्वेन विंदते प्राप्नोतीति गां स्वर्गं विंदते प्राप्नोतीति वा गोविंद इति अभ्यधातां उक्तवंतौ॥ इयं गोविंदपदव्युत्पत्तिर्गोविंद इति चाऽभ्यधादित्यत्र श्रीधरस्वामिभिर्दर्शिता ॥ सुबोधिन्यां तु अजंतं विदशब्दं स्वीकृत्य मध्ये वकाररूपममृतबीजं निक्षिप्य च गवामिंद्रो गोविंद इति व्युत्पत्तिर्दर्शिता ॥ अत्र बीजं तु नारदपंचरात्रे पंचमरात्राष्टमाऽध्याये ॥ गवामिंद्रः स्मृतो यस्माद्वाचामिंद्रस्ततः परं ॥ अतो गोविंद इति च कीर्त्यते वेदवादिभिरिति ॥ इंद्रेण कामधेन्वा च गोविंदेत्यभिहितं ततः प्रभृति गोविंदेति नाम प्रकटमभूत्इति भावः ॥ ततः अभिषेकपूर्वकनामकथनानंतरं स देवेश इंद्रस्तदादेशाद्भगवदाज्ञया उभयरीत्या प्रकारद्वयेन स्वस्थतां स्वास्थ्यं स्वर्गस्थत्वं च आससाद प्राप्तवान् ॥ स्वस्थचित्तो भूत्वा स्वास्पदं गतवानित्यर्थः ॥ ३१ ॥

**प० ॥ गोकुलं गोकुलं दृष्ट्वा गोलोकस्थाऽथ गौरसौ॥ निजं जगाम किं लोकं शोभासाम्यं समीक्षितुं॥ ९५॥**

पूर्वोक्ताया गोर्गोलोकगमनमुत्प्रेक्षापूर्वकं वर्णयति ॥ गोकुलमिति ॥ अथ गोलोकस्था असौ गौः कामधेनुः गोकुलं तदाख्यं श्रीकृष्णनिवासस्थानं॥गोकुलं गवां कुलं यस्मिंस्तद्गोकुलं एतादृशं दृष्ट्वा शोभासाम्यं गोकुलस्य स्वलोकस्य च शोभासादृश्यं समीक्षितुं किं द्रष्टुमिव निजं लोकं जगाम ॥ गोः स्वलोकगमनस्य मदीये लोकएतादृशी शोभा ऽस्ति नवेति संशयपूर्वकतच्छोभासाम्यनिरीक्षणोद्देश्यकत्वोत्प्रेक्षणेन गोलोकादप्येतस्याऽधिकशोभाशालित्वं ध्वनितं ॥ ९५ ॥



**सुरभिक्षीरसंसिक्तं भक्तानंदकरं तदा ॥मत्वा देवाः प्रववृषुः सुरभीणि सुमानि ते ॥ ९६ ॥**

सुरभीति ॥ भक्ताऽऽनंदकरं श्रीकृष्णं सुरभ्याः कामधेनोः क्षीरेण संसिक्तमभिषिक्तं यद्वा सुरभ्या स्वक्षीरेण संसिक्तं इति मत्वा ते देवाः सुरभीणि सौगंध्ययुतानि सुमानि कल्पवृक्षोद्भवानि कुसुमानि प्रकर्षेण ववृषुः ॥ कृष्णोपरि पुष्पवृष्टिं चक्रुरित्यर्थः ॥ ९६ ॥

**गोवर्धनाऽचलवरोद्धृतिजं श्रवस्तद्गोवर्धनाऽचलमभूद्धि यतोऽत्र नव्यं॥वृद्धश्रवःसमभिधा प्रथिताऽथ युक्ताऽऽसीद्वृत्रहंतुरधुना प्रबुधैः प्रगेया॥ ९७॥**

गोवर्धनेति॥अत्र लोके हि यस्माद्गोवर्धनाऽचलवरोद्धृतिजं गोवर्द्धनाख्यगिरिराजोद्धरणजन्यं तच्छ्रवः श्रीकृष्णकीर्तिः गोवर्धनाचलं गोः स्तुतिरूपवाण्या वर्धकं तच्च तदचलं च तथाविधमभूत्॥ यतश्चेदं नव्यं ततो हेतोः प्रबुधैः प्रगेया अथच प्रथिता प्रख्याता वृत्रहंतुरिंद्रस्य वृद्धश्रवःसमभिधा वृद्धश्रवा इति नाम अधुना युक्ता वृद्धं जीर्णं श्रवः कीर्तिर्यस्य स वृद्धश्रवा इत्यनुगताऽर्थत्वेन योग्या आसीत् ॥ एतावत्पर्यंतमिंद्रस्य कीर्तिर्नव्या आसीत् अधुना तु तद्गर्वनिरसनार्थं गोवर्द्धनोद्धरणेन स्तुत्यस्याऽचलस्य नव्यस्य च भगवद्यशसः प्रसरणेनाऽर्थादिंद्रकीर्तेर्वृद्धत्वमेवाऽऽसीदिति भावः ॥ वसंततिलका वृत्तं ॥ ९७ ॥

**श्रीगोवर्द्धनधारणे धृतिधरं गोरक्षणे तत्परं शक्राऽमीवविनाशनैकसुकरं सौंदर्यरत्नाकरं॥ वेषेणाऽतिमनोहरं नटवरं वर्णेन शुभ्रेतरं गोपीमध्यचरं भजे सुखकरं तं गोकुलेशं परं॥ १८॥**

गोवर्द्धनोद्धरणलीलावर्णनप्रकरणसमाप्तौ मंगलमाचरति॥ श्रीति॥ अहं परं परमात्मानं गोकुलेशं गोकुलस्वामिनं तं श्रीकृष्णं भजे॥ गोकुलेशमित्यनेन गोकुलस्थानां सर्वेषामेतदधीनप्रवृत्तिकत्वं सूचितं ॥ अतएव च भगवत्प्रवर्तनेनेंद्रयागपरित्यागपूर्वकं गोवर्धनयागे तेषां प्रवृत्तिः॥ ननु भगवत एतत्करणे किं प्रयोजनमिति चेदिंद्रगर्वपरिहार एव प्रयोजनमित्यभिप्रायगर्भं भगवद्विशेषणमाह॥ शक्राऽमीवेति ॥ शक्रस्येंद्रस्य यदमीवं मदरूपो दोषस्तस्य विनाशनो यज्ञप्रतिघातक्रुद्धेंद्रकृताऽतिवृष्टिनिवारणाय गोवर्द्धनोद्धरणद्वारा नाशकः एकः शोभनः करो यस्य तं ॥ ननु भगवतः करस्येंद्रगर्वनाशकत्वं कथमित्याकांक्षायां गोवर्द्धनधारणेन गोकुलपीडकवर्षणबाधानिवर्त्तनपूर्वकगोकुलरक्षणद्वारकमेव तदित्याशयगर्भं विशेषणद्वयमाह ॥ श्रीगोवर्द्धनेति ॥ गोरक्षणइतिच ॥ श्रीगोवर्द्धनस्य धारणे विषये धृतेर्धैर्यस्य धरं ॥ अनेनाऽऽयासाऽभावो बोध्यते ॥ धृतिर्धारणधैर्ययोरित्यमरः ॥ तथा ॥ गवां रक्षणे तत्परं नित्याऽऽसक्तं॥ अत्रगोशब्दो गोपादीनामप्युपलक्षकः॥एवमपि क्रौर्यादिप्रसक्त्या मनोहरत्वाऽभावसंभावनाऽपि कदाचित्प्रसज्येतेत्यतस्तन्निवृत्तये विशेषणषट्कं तत्राऽऽद्यमाह॥सौंदर्येति॥सौंदर्यस्य रत्नाकर इव समुद्र इवेति सौंदर्यरत्नाकरस्तं ॥ अत्र रत्नाऽऽकरत्वो



क्त्या परमकाष्ठापन्नं भगवत्सौंदर्यं बोधितं ॥ द्वितीयमाह ॥ वेषेणेति ॥ पूर्वविशेषणेन स्वाभाविकमनोहरत्वेऽपि वेषेण कृत्वाऽतिमनोहरं॥ तृतीयमाह ॥नटवरमिति॥एतैर्विशेषणैर्बर्हाऽऽपीडं नटवरवपुरित्यादिनोक्तं भगवत् स्वरूपं बोधितं॥चतुर्थमाह ॥वर्णेनेति ॥वर्णेन शुभ्रेतरं कृष्णमित्यर्थः॥एतेन साक्षाच्छृंगाराऽधिदैवतमयमेवेति बोधितं॥ पंचममाह॥ गोपीति ॥ रासक्रीडायां गोपीनां मध्ये चरतीत्येवंविधस्तं ॥ षष्ठमाह ॥ सुखकरमिति ॥ अनेन कृताऽपराधानामपि पूतनादीनां निरतिशयसुखदातृत्वं भगवतोबोधितं ॥ शार्दूलविक्रीडितं वृत्तं ॥ १८ ॥

**अथ॥ रात्रावुत्थायोत्तरस्यां कदाचित्कालिंद्यां वै स्नातुमागात्सनंदः ॥ तीरं धीरैर्मारुतैः सेव्यमानं तत्राऽऽहेदं पारणाकृत्यसिध्यै॥ १९॥**

अथाऽपररात्रस्नानोद्युक्तस्य वरुणदूताऽऽहृतस्य नंदस्य प्रत्यानयनरूपां लीलां वर्णयितुमुपक्रमते ॥ अथेति ॥ रात्राविति ॥ अथ कदाचित्स नंदः पारणाकृत्यसिध्यै ॥ तादर्थ्येचतुर्थी ॥ उत्तरस्यां रात्रौ रात्रेः पश्चिमयामे इत्यर्थः ॥ धीरैर्मारुतैः सेव्यमानं कालिंद्यास्तीरं प्रति स्नातुमागात् ॥ तत्र च इदं वक्ष्यमाणं यमुनास्तुतिरूपं वाक्यमाहेत्यन्वयः ॥ अर्थस्तु स्फुटः ॥ पारणाऽत्रैकादशीव्रतसंबंधिनी बोध्या ॥ तदुक्तं श्रीमद्भागवते ॥ एकादश्यां निराहार इत्यादि ॥ शालिनी वृत्तं ॥ १९ ॥

**अये तरणिनंदिनि प्रतिदिनं त्वदीयाऽमृताद्भवत्यथ शरीरिणामुचितमत्र पुष्ट्यागमः॥परंत्वियमय**

त्वतो भवभवौष्ण्यतप्ताऽऽत्मने दिशस्यतिविचित्रता सुदृढकृष्णवर्त्माऽऽश्रयं॥ १००॥

नंदोक्तमेवाह ॥ अयेइति ॥ अये तरणिनंदिनि हे यमुने अत्र लोके त्वदीयामृतात्त्वत्संबंध्युदकात् शरीरिणां प्रतिदिनं पुष्ट्यागमः शरीरपोषप्राप्तिर्भवति अथच पुष्टिमार्गप्राप्तिर्भवति॥ स च मार्गोऽधुना श्रीमद्वल्लभाचार्यैः प्रकटित उपलभ्यते उचितमेतत् ॥ त्वत्संबंध्यमृतसेवनेन शरीरपुष्टिप्राप्तिः अथच तव परब्रह्मरसरूपत्वात्त्वत्सेवनेन पुष्टिमार्गप्राप्तिश्च योग्येत्यर्थः ॥ यमुनायास्तथात्वं तु यमुनाष्टकटिप्पण्यां श्रीपुरुषोत्तमचरणैः संगृहीतेषु पाद्मोक्तयमुनामाहात्म्यस्थवाक्येषु स्फुटं ॥ तथाहि ॥ त्रय्येषा ऋग्यजुःसाम्ना मादित्य इति गीयते ॥ सम्यक् ज्ञानं च यत्तेषां विश्वेषां कर्मणां मुने ॥ संज्ञेति साऽस्यां यो धर्मो धर्मसंज्ञः स उच्यते ॥ रसो यः परमाऽऽधारः सच्चिदानंदलक्षणः ॥ ब्रह्मेत्युपनिषद्गीतस्तदेव यमुना स्वयमिति ॥ परंतु भवभवौष्ण्यतप्तात्मने संसारजन्यतापतप्तदेहाय ॥ सुदृढेति ॥ सुदृढो यः कृष्णवर्त्मनः कृष्णमार्गस्याऽऽश्रयस्तं श्लेषेणकृष्णवर्त्मनः अग्नेराश्रयं अयत्नतः अनायासेन दिशसि ददासि इयमतिविचित्रता ॥ स्वयममृतरूपाऽपि तप्तस्य पुरुषस्य कृष्णवर्त्माऽऽश्रयं दिशसि न पुनः शीततामित्यत्यंतमाश्चर्यमित्यर्थः ॥ यद्वा इयमतिविचित्रतेति काकुः ॥ तेनाऽतिविचित्रता किं अपितु नेत्यर्थः ॥ यतस्त्वं तरणिनंदिनी उष्णरश्मितनया ॥ कारणगुणाः कार्यगुणाऽऽरंभकाइति न्यायेन पितृनिष्ठं तापप्रदत्वं त्वय्यपि प्राप्तं तच्च स्वयममृतरूपत्वादग्निकरणकमिति बोध्यं॥पृथ्वीवृत्तं ॥ १०० ॥



ग० ॥ एवमुच्चार्यव्रजवर्योनमज्जनानेकाकतर्जनतापमार्जनकृतालस्यवर्जनवैकर्तनसरिदंतर्जले निर्जनेसममज्ज॥ ३२॥

एवमिति ॥ व्रजवर्यो नंदः ॥ एवं पूर्वोक्तप्रकारकं श्रीयमुनास्तुतिवाक्यमुच्चार्य निर्जने अपररात्रत्वेन जनसंसर्गशून्ये ॥ नमदिति ॥ नमतां जनानामनेकानि यान्यकानि दुःखानि तेषां यत्तर्जनं तेन यत्तापमार्जनं तापनिवारणं तद्विषये कृतमालस्यवर्जनं ययैवंभूता या वैकर्तनी विकर्तनस्य विशेषेण जनदुःखकर्तनकर्तुः सूर्यस्य अपत्यं सूर्यमंडले रहट्टचक्रवद्भ्रमणात्तत्संबंधिनी वा॥ भ्रमणे प्रमाणं तु॥दिवसे दिवसे भानुरादायाऽऽदाय वत्सलः ॥ उदयाऽचलतः पुत्रीं नयत्यस्ताचलं मुने ॥ यमुनाऽपि ततो नित्यं गच्छंत्यास्ते ऽक्षया ऽव्यया ॥ विशत्योघेन सादित्यमुदयादौ पुनः पुनः ॥ एवं भूमौ तथाऽऽकाशे घटीयंत्रमिवाऽनिशं ॥ यमुनाऽस्तोदयाऽद्रिभ्यां भ्रमंत्यास्ते ऽक्षयोदकेति यमुनाष्टकटिप्पण्यां श्रीपुरुषोत्तमचरणैरुदाहृतानि यमुनामाहात्म्यस्थवाक्यानि॥एवंविधा या सरिद्यमुना तस्या यदंतर्जलं तस्मिन् निममज्ज मज्जनं कृतवान्॥ वैकर्त्तनीत्यत्र शिवाद्यण् ॥ इदमर्थे वा अण् ॥ वैकर्तनसरिदित्यत्र पुंवत्कर्मधारयेति पुंवद्भावः ॥ ३२ ॥

तत्क्षणं॥ प० ॥ असुरो ऽसुरहंतुर्वै पिता ऽयमिति किं धिया॥ नंदं समानयत्पाशिसदनं तस्य सोऽनुगः॥ १०१ ॥

तत्क्षणमिति ॥ मज्जनसमयएव ॥असुरइति ॥ तस्य वरुणस्याऽनु

गो ऽनुचरो ऽसुरः नंदं पाशिसदनं वरुणगृहं ॥ प्रचेतावरुणःपाशी-
त्यमरात् ॥ अनयत् नीतवान् ॥ अत्र हेतुमुत्प्रेक्षते ॥ वै निश्चयेन
अयं नंदः असुरहंतुः श्रीकृष्णस्य पिताऽस्ति इति धिया बुध्या
किं ॥ अयमस्माकमसुराणां हंतुः पितेति बुध्या तद्बंधनं कर्तु-
मिव पाशिसदनमनयदिति भावः ॥ १०१ ॥

तदा ॥ श्रुत्वाऽऽक्रोशक्रमं द्राग्व्रजनिजजनताया
स्तदानीं व्रजेशः स्वीयानां दुःखहर्ता निजपितुरप
हर्तारमाज्ञाय सोऽगात् ॥ गेहं वारीशितुस्तद्विनयभ
रयुतेनाऽर्चितस्तेन बुद्धिं चक्रे गंतुं गृहीत्वा व्रजम
थतमहो दृष्टलोकेशऋद्धिं ॥ १०२ ॥

तदेति ॥ नंदनयनसमये ॥ श्रुत्वेति ॥ स्वीयानां दुःखहर्त्ता व्रजे-
शः सः श्रीकृष्णः॥व्रजेति ॥ व्रजसंबंधिनिजजनसमूहस्य आक्रो-
शक्रमं श्रुत्वा द्राक् शीघ्रं निजपितुरपहर्तारमाज्ञाय तदानीं वारी-
शितुर्वरुणस्य तत् यत्र मनसा नंदनयनं निश्चितं तद्गेहं अगात् ॥
अथ विनयभरयुतेन तेन वरुणेन अर्चितः सन् दृष्टलोकेशऋद्धि
तं नंदं गृहीत्वा व्रजं गंतुं बुद्धिं चक्रे ॥ एतेन भगवद्दर्शनार्थमेव
वरुणेन नंदनयनं कृतं नत्वैश्वर्यगर्वेणेति सूचितं ॥ स्रग्धरा वृत्तं ॥
॥ १०२ ॥

लट्वाऽकुलचटत्कारवाचाटितदिगंगणे ॥ प्रगे व्रजे
शमादाय मुदाऽगाद्व्रजरक्षकः ॥ १०३ ॥





लट्वेति ॥ प्रगे प्रातः काले ॥ लट्वा चटकाख्यः पक्षिभेदः ॥ व्रजे-
शं नंदं ॥ शेषं सुगमं ॥ प्रातरगादित्यनेन आगमने विलंबाऽभावः
सूचितः ॥ लट्वेत्यादिविशेषणेन प्रातः कालस्वभाववर्णनात् स्वभा-
वोक्तिरलंकारः ॥ १०३ ॥

इति श्रीबालकृष्णचंपूप्रबंधे
तृतीयः स्तबकः समाप्तः